गदाधरराजगुरुकृतः

शुद्धिसारः

प्रथमभागः

सम्पादकः
डा. जयकृष्णमिश्रः

धर्मशास्त्रविभागः
श्रीजगन्नाथसंस्कृतविश्वविद्यालयः,
श्रीविहारः, पुरी

गदाधरराजगुरुकृतः

शुद्धिसारः

प्रथमभागः

सम्पादकः

डा. जयकृष्णमिश्रः

धर्मशास्त्रविभागः

श्रीजगन्नाथसंस्कृतविश्वविद्यालयः,

श्रीविहारः, पुरी

शुद्धिसारः

Published with the partial financial assistance given by U.G.C. under the authority of Sri Jagannath Sanskrit Vishvavidyalaya, Srivihar, Puri.

सम्पादकः

डा. जयकृष्णमिश्रः

उपाचार्यः

स्नातकोत्तरधर्मशास्त्रविभागः

श्रीजगन्नाथसंस्कृतविश्वविद्यालयः

श्रीविहारः, पुरी - ७५२००३

© स्वत्वं सम्पादकाधीनम्

प्रथमसंस्करणम् - २००१

मूल्यम् - **Rs. 50/-** (Fifty Rupees)

Published by

Sri Damodar Puspalak,

Sadgranth Niketan, Srimandir, Puri

Printed by : **GRAPHIC POINT**, Marichikote Lane,

Puri - 752001

SHRI JAGANNATH SANSKRIT VISHVAVIDYALAYA

Professor H. K. Satapathy
M.A., LL.M., Ph.D. Sahitya-Puran-Acharya
CHAIRMAN, P.G. COUNCIL,
Shri Jagannath Sanskrit Vishvavidyalaya
Srivihar, Puri - 752003 (Orissa)

✆ : 22365 (Off)
26660 (Off)
24568 (Res)
Fax : (06752) 25673 (Off)

FOREWORD

It gives me immense pleasure to write a few words introducing hitherto unpublished treatise entitled *"Śuddhisāra"* of Gadadhar Rajaguru of Orissa, edited by Dr. Jayakrishna Mishra, an eminent scholar in the field of Dharmasastra. Orissa, the abode of Lord Jagannath, has earned the distinction in observing several spiritual and socio-ritual functions on various occasions for which a number of authors or law-makers beginning from Satananda in the concerned areas have codified set of rules and codes of conduct in this land among whom the name of Gadadhar Rajaguru deserves special mention.

Gadadhar Rajaguru, born to Sri Nilambar and Smt. Janaki, during 1650 A.D. was associated with the then Gajapati king of Orissa, Sri Sri Gajapati Harekrishna Dev, an ardent devotee of Lord Jagannath in the capacity of the preceptor of the king. The Socio-cultural functions of the people of Orissa were being guided and governed by the set of principles laid down by the *Smṛtikāras* or law-givers of Orissa and these codes of conduct contributed substantially to the Utkalaschool of Dharmasastra. The contribution of Gadadhar Rajaguru to the history and development of Utkalaschool of Dharmasastra is, no doubt, outstanding. His famous work Gadadhar Paddhati according to which almost all the rituals and festive occasions are determined and observed in various parts of the state, consists of eighteen parts narrating the salient features of *Ācār*, (conduct) *Kāla*

(time), *Vivāha* (marriage), *Śuddhi* (purity) etc. Two important parts of Gadadhar Paddhati were published by Asiatic Society, Calcutta and all these treatises have been extremely popular among the scholars of Dharmasastra and have been further useful to the common people of the country interested in observing the rituals meticulously. Now it is the turn of Dr. Mishra, who deserves to be thanked for the sincere efforts he has made to bring "*Śuddhisāra*", one of the significant parts of Gadadhar Paddhati, to the light of the earth.

Śuddhisāra consists of three chapters dealing with the perfection and purification of three important phenomena i.e. *Kāla* (time), *Dravya* (Substances) and *Sarīra* (Body) which relate to the very existence of human life. It goes without saying that publication of this useful and important part of Gadadhar Paddhati will certainly cater to the needs of many interested in the cardinal principles, problems and solutions of Dharmasastra. Meritorious contribution of Dr. Mishra for the successful publication of the book has undoubtedly enhanced the standard of the work. Dr. Mishra has long experience in teaching, research and editing manuscripts and has published a number of books to his credit. It is in the fitness of the things that the present publication has assumed significance because of the vast experience and deep knowledge of Dr. Mishra. I once again express my gratitude to him for extending me this opportunity to pay regards to the extraordinary calibre of a great scholar by writing these few words. I am confident that this publication will earn wide appreciation as of other publications of Dr. Mishra and I wish him further success in life.

Harekrishna Satapathy
Chairman,
P.G. Council.

Dr. Kishore Chandra Mohapatra
Professor and H.O.D.
Department of Dharmashastra
Sri Jagannath Sanskrit Visvavidyalaya
Srivihar, Puri - 752003

शुभाशंसा

उत्कले लब्धप्रतिष्ठेषु धर्मशास्त्रीयनिबन्धकारेष्वष्टादशशतकीयो गदाधरराजगुरुः सर्वश्रेष्ठ इति विदितचरं समेषाम् । तत्प्रणीतेषु कालाचार-शुद्धि-व्रत-दान-संस्काराद्यष्टादशसारसंज्ञकेष्वमूल्यग्रन्थरत्नेषु केवलं कालाचारसारावद्यावधि प्रकाशितौ । अवशिष्टेषु केचन मातृकारूपेण क्वचित् संग्रहालयादिषु संरक्षिताः केचिच्च लुप्ता एव । एवंविधेषु प्रसिद्धेषु प्रामाणिकेषु मातृकारूपेण विद्यमानेषु दुर्ल्लभग्रन्थेषु शुद्धिसारः सम्प्रति प्राकाश्यं नीयत इति महतः सन्तोषस्य विषयः ।

श्रीजगन्नाथसंस्कृतविश्वविद्यालयस्य स्नातकोत्तरधर्मशास्त्रविभागे उपाचार्यत्वेन कर्म कुर्वाणाः श्रीमन्तो डा. जयकृष्णमिश्रमहोदया शुद्धिसारस्यास्य सम्पादनं नागरीलिप्या च प्रकाशनं विधाय धर्मशास्त्रजगति समादृता भविष्यन्तीत्यत्र नास्ति सन्देहः । ग्रन्थोऽयं न केवलं धर्मशास्त्रीयच्छात्राणां गवेषकाणामध्यापकानां वोपकाराय भविष्यति, अपि तु साधारणानां जनानां समाजे प्रचलतां शुद्धिव्यवस्थाप्रदानेन महते कल्याणाय कल्पयिष्यते । एतादृशग्रन्थस्यास्य सम्पादनेन मिश्रमहोदया धर्मशास्त्रसाहित्यस्याभिवृद्ध्या सह विद्वत्समाजस्य समादरं लप्स्यन्त इति द्रढीयान् मे विश्वासः ।

श्रीमन्नीलाद्रिनाथचरणारविन्दयोस्तेषामुत्तरोत्तरामुन्नतिं कामये । इति शम् ॥

विदुषां विधेयः

माघसप्तमी
१.२.२००१

किशोरचन्द्रमहापात्रः

मुखबन्धः

आसीत् कश्चन प्रसिद्धधर्मनिबन्धकारः उत्कलीयधर्मशास्त्रसंप्रदाये गदाधरराजगुरुनामा । सकलस्मृति-ज्योतिष-पुराणादिषु शास्त्रेषु अगाधपाण्डित्यस्याधिकारी आसीदसौ महोदयः । एतद्विरचित-धर्मशास्त्रीयनिबन्धग्रन्थानां प्रणयनशैली सर्वथा भिन्ना अभिनवा च वर्त्तते । तस्य लेखनशैली, शब्दसंयोजनं, पाण्डित्यस्य प्रौढता च सर्वथा आकर्षणीया । सनातनधर्मपालनतत्परेऽस्मिन् उत्कलभूभागे सप्तदशशतकस्यान्तिमभागे अष्टादशशतकस्य प्रथमचरणे च उत्कलगजपतीनां पृष्ठपोषकतां स्वीकृत्य असौ गदाधरः धर्मनिबन्धप्रणयने प्रवृत्तः आसीत् ।

विद्वन्मूर्द्धन्योऽयं गदाधरः कौशिकगोत्रीयः ब्राह्मणः आसीत् । पुर्य्याः उपकण्ठे वीरहरेकृष्णपुरनामके ग्रामे कश्चित् बृहत्पण्डितोपाधिलब्धः श्रीमान् श्रीकृष्णमहापात्रः राज्ञः पुरुषोत्तमदेवस्य शासनकाले रराज । स च गदाधरराजगुरोः पितामहः आसीदिति तस्य कालसारग्रन्थस्य मङ्गलाचरणाज्ज्ञायते । अस्य श्रीकृष्णमहापात्रस्य अद्भुतप्रतिभायां पाण्डित्यस्य पारदर्शितायां च मुग्धो भूत्वा खुरुधागडस्य राजा तं 'बृहत्पण्डितो' पाधिनाऽभूषयत् । स च नीतिरत्नाकरनामकस्य धर्मनिबन्धग्रन्थस्य रचयिता आसीत् । अस्य श्रीकृष्णमहापात्रस्य हलधरः, नीलाम्वरः, यमेश्वरश्चेति त्रयः पुत्राः आसन् । तस्य ज्येष्ठपुत्रः हलधरः शारदवाजपेयिनामकं यज्ञं कृत्वा गजपति-हरेकृष्णदेवस्य प्रियभाजनोऽभूत् । राज्ञः अनुग्रहात् स पुरीनिकटवर्त्ति-वीरहरेकृष्णपुरशासनं प्राप्तवान् ।

हलधरस्य कनिष्ठभ्राता नीलाम्वरः गदाधरस्य पिता आसीत् । माता च जानकीदेवी आसीदिति शुद्धिसारग्रन्थादुपलभ्यते । यथा -

> 'यज्वा यच्चरमो यमेश्वर इति भ्राता बृहत्पण्डित-
> स्तं नीलाम्वरनामकं च पितरं श्रीजानकीमातरम् ।

नत्वा राजगुरुर्गदाधरसुधीः स्वैः शुद्धिसाराभिधं
पद्यैः संतनुते प्रबन्धमृषिवाङ्मयोत्कलाचारकम् ॥ (मङ्गल श्लो. ४)

अयं नीलाम्वरः न केवलं धर्मशास्त्रे अपि तु वेदान्त-ज्योतिषादिषु शास्त्रेषु निपुणः परमविद्वांश्च आसीत् । सः श्रीजगन्नाथदेवस्य स्नानोत्सवमाश्रित्य 'स्नानोत्सवस्तोत्र' मेकं रचितवान् । नीलाम्वरः चतुर्मखादिबहूनां यज्ञानामनुष्ठाता आसीत्। गजपतिहरेकृष्णदेवस्य (१७१५-१७१८ स्वी.अ.) राजगुरुरपि आसीदसौ नीलाम्वरः । तस्य पाण्डित्यस्य पराकाष्ठायां मुग्धः सन् गजपतिः तं स्वर्णतारखचितं छत्रमेकमुपाहृतवान् । अस्य कनिष्ठभ्राता यमेश्वरोऽपि एकः प्रसिद्धयाज्ञिकः विख्यातपण्डितश्चासीत् ।

गदाधरराजगुरोः वंशस्तम्भः

श्रीकृष्णमहापात्रः (कौशिकगोत्रजः)

हलधरः — नीलाम्वरः — यमेश्वरः

नीलाम्वरः → श्रीगदाधरराजगुरुः

पवित्रतमायामस्यामुत्कलभूमौ जन्मग्रहणं कृत्वा उत्कलप्रदेशं धर्मशास्त्रवाङ्मयं च गौरवमण्डितं कृतवानसौ गदाधरः। गदाधरस्य ज्येष्ठतातः हलधरः राज्ञः हरेकृष्णदेवस्यानुग्रहात् पुरीनिकटवर्त्ती-वीरहरेकृष्णपुरशासनं प्राप्तवान् । अतः गदाधरस्योत्कलीयत्वे नास्ति संशयलेशः ।

अयं गदाधरः उत्कलीयप्रख्यात-धर्मनिबन्धकारस्य नरसिंहवाजपेयिनः परवर्त्ती तथा धर्मनिबन्धकारस्य रघुनाथदाशस्य समकालीनः आसीत्। असौ स्वग्रन्थे बृहस्पति-विप्रमिश्र-विश्वनाथमिश्र-शम्भुकर-विद्याकर-कालिदासचयनिप्रभृतीनामुत्कलीयधर्मनिबन्धकाराणां नामानि मतानि चोद्धरति । अमुं गदाधरराजगुरुमपि कृष्णमिश्र - भुवनेश्वरवडपण्डाप्रमुखाः धर्मनिबन्धकाराः स्मरन्ति। निबन्धकाराणां पौर्वापर्याकलनात्, हरेकृष्णदेवस्य

नृपतेः राजगुरुत्वेन च वर्त्तमानत्वात् अस्य कालः खीष्टात् परं सप्तदशशतकस्यान्तिमार्द्धात् अष्टादशशतकस्य च प्रथमचरणाभ्यन्तरे एव स्थापयितुं शक्यते।

गदाधरराजगुरुः गदाधरपद्धतिनामानं धर्मनिबन्धग्रन्थं प्रणीतवान्। अस्य चापरं नाम स्मृतिसारः। अयं च ग्रन्थः अष्टादशभागेन विभक्तः। तेषु आचारसारः, कालसारः, शुद्धिसारः, व्रतसारः, दानसारः, विवाहसारः, स्नानसारः, संस्कारसारश्चेति प्रमुखाः सन्ति। कालसारग्रन्थे शुद्धिसार-दानसार-व्रतसार-विवाहसारग्रन्थानामुल्लेखः दृश्यते। आचारसारेऽपि स्नानसार-संस्कारसारयोः उल्लेखः प्राप्यते। एतेषु ग्रन्थेषु आचारसार-कालसारौ देवनागराक्षरेण एसियाटिक् सोसाइटि अफ् वेङ्गलद्वारा १९०५ खीष्टाब्दे प्रकाशितौ वर्त्तेते। कालसारोऽपि उत्कलप्रान्ते बहुधा प्रकाशितोऽस्ति। परन्तु शुद्धिसाराख्योऽयं ग्रन्थः नाद्यावधि लोकलोचनमागतः। अतः काण्डत्रयात्मकोऽयं ग्रन्थः कथञ्चिदपि प्रकाश्येत चेत् तर्हि सर्वेषां महदुपकाराय भवेदिति।

विश्वविद्यालयस्यानुदानायोगानुकूल्येन ग्रन्थमिमं प्रकाशयितुं कश्चनावसरो मया प्राप्तः। तदर्थमर्थसाहाय्यप्राप्तये श्रीजगन्नाथसंस्कृतविश्वविद्यालयस्य कर्त्तृपक्षाः मया प्रार्थिताः। मम प्रार्थनां च सफलीकर्त्तुं विश्वविद्यालयस्योन्नयनाधिकारिणां दायित्वं निर्वाहयतां प्रफेसर डा. किशोरचन्द्रपाढीमहोदयानां प्रयासः सर्वादौ अभिनन्दनीयः। सर्वविधसारस्वतकर्मसु शुभाशिषप्रदायकरूपेण प्रेरणादातृरूपेण च वर्त्तमानाः प्रफेसर डा. हरेकृष्णशतपथिमहोदयाः, प्रफेसर डा. किशोरचन्द्रमहापात्रमहोदयाश्च मम चिरवन्दनीयाः। अन्ते ग्रन्थस्य परिपूर्णतायै भगवतः पुरुषोत्तमस्य शुभदृष्टिं कामयमानोऽहं विरमामि विस्तरात् इति।

वसन्तपञ्चमी
२९.१.२००१
श्रीविहारः, पुरी

विनीतः
जयकृष्णमिश्रः

विषयसूची

प्रथमकाण्डे कालशुद्धिः

१.	कालशुद्धिः	२
२.	मलमासे कर्त्तव्याकर्त्तव्यानि	३
३.	हरिशयने कर्त्तव्याकर्त्तव्यानि	१२
४.	गुर्वादित्ये शुक्रास्ते च कर्त्तव्याकर्त्तव्यानि	१४

द्वितीयकाण्डे भूम्यादिद्रव्यशुद्धिः

१.	भूमेरशौचम्	१८
२.	भूशुद्धिः	१९
३.	भूशुद्धिविभागः	२०
४.	जलशुद्धिः	२२
५.	नदीरजस्वला	२६
६.	परकीयनिपानादौ व्यवस्था	२७
७.	द्रव्यशुद्धिः	३०
८.	वस्त्रादिशुद्धिः	३३
९.	तैजसपात्रादिशुद्धिः	३८
१०.	यज्ञपात्रशुद्धिः	४४

११.	पित्तलादिप्रतिमाशुद्धिः	४५
१२.	अन्नादिशुद्धिः	४७
१३.	धान्यादिमानम्	४८
१४.	आमान्नादिशुद्धिः	५९
१५.	अभोज्यान्नाः	६१
१६.	अथ प्रकीर्णशुद्धिः	६९
१७.	क्षत्रियादयाचितप्रतिग्रहे	७०
१८.	शूद्रादयाचितप्रतिग्रहे	७१
१९.	अक्षत्रियप्रतिग्रहे	७३
२०.	आपद्धर्मः	७६
२१.	श्राद्धलक्षणम्	८१
२२.	चातुर्मास्यनियमाः	८५
२३.	पुष्पानां पर्युषितविचारः	८६
२४.	तैलाभ्यङ्गविचारः	८८
२५.	स्पर्शदोषविचारः	८९
२६.	द्रव्यशुद्धिः	९२
२७.	कारुहस्तशुद्धिविचारः	९३
२८.	जगन्नाथप्रसादस्य स्पृष्टास्पृष्टविचारः	९५

• • • •

ॐ

शुद्धिसारः

प्रथमकाण्डः

अशेषवर्णाश्रमधर्मवृद्धये
शरीरिमात्रस्य च शीघ्रमुक्तये ।
निजालये श्रीपुरुषोत्तमाह्वये
दधद्वपुर्दारुमयं महः श्रये ॥ १ ॥

रचितजननिकायाभीष्टदानैकदक्षः
क्षपयतु विमलायाः सानुकम्पः कटाक्षः ।
स्मृतिनिकरगभीराम्भोधिमध्यार्थरत्ना-
नयनकृतिविधाने नूनं यत्नेऽन्तरायम् ॥ २ ॥

यो नीलाम्वरराजगुर्वभिधया ख्यातः क्षितौ श्रीहरे -
कृष्णाख्यक्षितिपेश्वरभूपतिना शिष्येण सम्मानितः ।
सौवर्णोडुचतुष्टयाच्युतपदाम्भोजाङ्ककृष्णातप-
त्राणेन द्विपचामरप्रभृतिभिश्चात्मीयचिह्नैः परैः ॥ ३ ॥

यज्वा यच्चरमो यमेश्वर इति भ्राता बृहत्पण्डित-
स्तं नीलाम्वरनामकं च पितरं श्रीजानकीं मातरम् ।
नत्वा राजगुरुर्गदाधरसुधीः स्वैः शुद्धिसाराभिधं
पद्यैः संतनुते प्रबन्धमृषिवाङ्मयोत्कलाचारकम् ॥ ४ ॥

कुर्य्यादर्हमशौचमित्यभिहितं शुद्धेर्बुधैः संहिता
शौचाभाव इति स्थिते त्विह गुरौ शौचं निरूप्य क्रमात् ।
क्वापि स्पष्टतया तथार्द्धिकतया कुत्रापि कुत्रापि वा
पद्येऽपि ग्रहणादिका बहुविधा शुद्धीप्सयो दीर्य्यते ॥ ५ ॥

कालद्रव्यनिकायकर्त्तृशुचितां श्रीशुद्धिसाराभिधः
ग्रन्थस्यास्य विलोकनेन नितरां ज्ञात्वैव तास्ताः क्रियाः ।
कुर्वन्त्यल्पधियोऽपि तत्र सुधियो ये ये प्रमाणैषिणः
तेषां तोषकृते करोति स पुनस्तद्विस्तरं सादरम् ॥ ६ ॥

अथ श्रीगदाधरराजगुरुमहापात्रः स्वकृतशुद्धिसारविलोकनेनैव सर्वशुद्धिज्ञानेऽपि तत्र प्रमाणान्वेषिणां सन्तोषाय प्रमाणमुपन्यसन् शुद्धिसारं सविस्तरं प्रारभते । तत्र प्रसक्तमेव प्रतिषिध्यत इति न्यायेन शुद्धेरशौचाभावरूपत्वादशौचस्य च कर्मानर्हरूपत्वात् कालद्रव्यकर्त्तृणां कर्मानर्हत्वे शुद्धिर्निर्णेया ।

तत्र कालशुद्धिः प्रथमकाण्डे, द्रव्यशुद्धिः द्वितीये, कर्त्तृशौचस्य बाह्याभ्यन्तरभेदेन द्वैविध्यं कर्त्तुर्बाह्याशौचशुद्धिश्च तृतीयकाण्डे । अस्मिन् ग्रन्थे काण्डत्रयम् । तत्र कालस्य सर्वकर्माङ्गत्वादादौ कालशुद्धिः निर्णीयते ॥ ६ ॥

कालस्याशुचिताऽधिमास्यधिहरि स्वापेऽथ याम्यायने
गुर्वादित्य उदीरितोभयविधेराश्येकतारैक्यतः ।
तस्यां सिंहवृहस्पती सुरगुरौ वाले च वृद्धे कवौ
सन्ध्यास्तंगतवालवार्द्धकवशान्नष्टे च शुद्धिं ब्रूवे ॥ ७ ॥

शिष्टवाक्यम् - गुर्वादित्ये गुरौ सिंहे नष्टे शुक्रे मलिम्लुचे ।
याम्यायने हरौ सुप्ते सर्वकर्माणि वर्जयेत् ।

तथा - बाल्यं वृद्धिं गते जीवे सर्वकर्माणि वर्जयेत् ।

वृद्धिर्वृद्धत्वम् । गुर्वादित्यो द्विविधः । एकराशिगतत्वेन एकनक्षत्रगतत्वेन चेति । एकनक्षत्रगतत्वं च भिन्नराशिस्थितत्वे सति बोद्धव्यम् ।

तथा च काश्यपः- ऋक्षैकमन्दिरगतौ यदि जीवभानू
शुक्रोऽस्तगः सुरवरैकगुरुश्च सिंहे ।
नारभ्यते व्रतविवाहगृहप्रतिष्ठा
क्षौरादिकर्मगमनागमनं च धीरैः ॥

नारभ्यते इत्यनेन आरब्धव्रतं कार्य्यम् । ऋक्षैकेत्यत्र मन्दिरराशिः तथा च बृहस्पतिसूर्य्यौ एकराशिगतौ च यदीत्यर्थः । एतेन बृहस्पतेरस्तगमनमप्युक्तम् । रविभोग्यनक्षत्रगतत्वमस्तत्वमिति लक्षणात् । तिथ्यादीनां शुद्धिर्नात्र विचार्य्यते सर्वजनसिद्धत्वात् । अतिचारादीनां शुद्धिः विनिवर्त्त्यते सर्वकर्मविषयत्वात् । गुर्वादित्य इति वाक्ये सर्वकर्मनिषेधः काम्यपरः । अत्र सर्वत्र साक्षिवचनानि मलमासादि वर्ज्यावर्ज्यनिर्णये लेख्यानि । मलमासादीनां लक्षणानि तु ग्रन्थगौरवभयान्न लिख्यन्ते । शुक्रनष्टत्वचातुर्विधप्रतिपादकवाक्यान्यत्रैव काण्डे लेख्यानि ॥ ७ ॥

लुप्ताब्देऽधिकवत्सरे मकरगे जीवेऽपि कालोऽशुचि-
स्तद्गौडादिषु सर्वकर्मकरणं देशेषु शिष्टैर्मतम् ।
कालाशुद्धिषु काम्यकर्मकरणं नैवाथ नैमित्तिकं
नित्यं कार्य्यमिह प्रतिप्रसवकान्मूलं विशेषं ब्रूवे ॥ ८ ॥

उत्तरशौरे - गुरोर्मध्यमसंक्रान्तिहीनश्चान्द्रोऽधिवत्सरः ।
वर्ज्यानि तत्र यज्ञार्थं प्रतिष्ठादीनि नाकिनाम् ॥

शतानन्दः - अतिचारगते जीवे नैति चेत् पूर्वमन्दिरं ।
लुप्तसंवत्सरो ज्ञेयः सर्वकर्मसु गर्हितः ॥
सिंहस्थं मकरस्थं च गुरुं यत्नेन वर्जयेत् ॥

इति । देवीपुराणवचनात् प्रतिष्ठादौ मकरबृहस्पतिरपि वर्जनीयः । तत्र लुप्तसंवत्सरे कर्मनिषेधे अपवादमाह सत्याचार्य्यः -

राशित्रयं संचरतेऽब्दमध्ये नायाति पूर्वं यदि लुप्तवर्षम् ।
जीवो न कर्माणि सदा च कुर्य्याद्विहाय गौडोड्रविहारदेशान् ॥

ज्योतिःशास्त्रे मकरबृहस्पतेरपवादः -

नर्मदा पूर्वभागे तु शोणस्योत्तरदक्षिणे ।
गण्डक्याः पश्चिमे पारे मकरस्थो न दोषभाक् ॥

एतदधिकसंवत्सरस्याप्युपलक्षणम् । तत्रास्मद्देशे शिष्टाचार एव प्रमाणम् । तथा च लुप्तवर्षाधिकवर्षमकरबृहस्पतिषु सर्वकर्मकरणं निःसन्दिग्धमेव । सर्वास्वपि

कालशुद्धिषु काम्यकर्मवर्जनं न नित्यनैमित्तिके इति सामान्यतः। विशेषस्तु तत्र लेख्यः॥ ८॥

काम्यारम्भसमापने न मलिने मासे तु कृच्छ्रादिकं
प्रारब्धं हि समापयेत्तदपि यन्मासाकृतं सावनात्।
आरम्भस्य समापनस्य च यदा मध्येऽधिमासस्तदा-
रब्धं कर्म समाचरेदथ नवे तीर्थामरेज्ये त्यजेत्॥ ९॥

पैठीनसिः - श्रौतस्मार्त्तक्रियाः सर्वाः द्वादशे मासि कीर्त्तिताः।
त्रयोदशे तु सर्वास्ता निष्फलाः इति कीर्त्तिताः॥
तस्मात् त्रयोदशे मासे कुर्य्यात्तान्न कथंचन।
कुर्वन्ननर्थमेवाशु कुर्य्यादात्मविनाशनम्॥

इति निष्फला इत्यभिधानात् काम्यकर्मनिषेधः।

'इष्यादि सर्वकाम्यं तु मलमासे विवर्जयेत्'

इति स्मृत्यन्तरोक्तेः।

'नित्यनैमित्तिके कुर्य्यात् प्रयतः सन् मलिम्लुचे'

इति बृहस्पतिवचनात् नित्यनैमित्तिककरणम्।

'अधिमासे निपतितेऽप्येष एव विधिक्रमः'

इति स्मरणादारब्धसमाप्तिमध्ये मलमासपातेऽपि पूर्वारब्धकाम्यं कार्य्यमेव। क्रियारब्धसमापने शुद्धकाल एव न तु मले।

असूर्य्या नाम ये मासा न तेषु मम सम्मतः।
व्रतानां चैव यज्ञानामारम्भश्च समापनम्॥ इत्युक्तेः।
प्रवृत्तं मलमासात् प्राक् काम्यं कर्मासमापितम्।
आगते मलमासेऽपि तत्समाप्यं न संशयः॥

इति काठकगृह्यवचनम्। सावनमानप्रवृत्तकृच्छ्रचान्द्रायणं हि न शास्त्रादिविषयम्। 'बाले वा यदि वा वृद्धे' इति बृहस्पतिवचनात्। अपूर्वदेवतामदृष्ट्वेति कल्पतरुलिखितवक्ष्यमाणगार्ग्यवचनात् च पूर्वदेवतादर्शनमपूर्वतीर्थयात्रां च मलमासे वर्जयेत्।

रोगाबर्षणशान्तिमोक्षकरणात् कालः प्रतीक्षासहः
आरम्भं च समापनं च मलिने काम्यं च कुर्य्याद् बुधः ।
नो मुञ्चेत् सकलं तदाप्यगतिकं नित्याग्निहोत्रादिकं
नित्यं सोमसवादि नो गतियुतं नाधानमप्याचरेत् ।। १० ।।

मलमासे प्रक्रान्ते द्वित्रिषु दिनेषु गच्छत्सु कश्चिद् बालो ग्रहब्रह्मराक्षसादिना गृह्येत यदि वा रोगवृद्धिर्महती भवेत् यदि वा वृष्टिः प्रतिबन्धः यदि वा राजद्रोह आपतेत् अथवा अभिचारः केनचित् प्रारभ्येत, तत्र मलमाससमाप्तिप्रतीक्षायां बालादि बाधादिकं भवेत् तस्मात् प्रभृति प्रतिकारस्य सपदि कर्त्तुमुचितत्वादाब्दिकादिकर्मसु शुद्ध्यनपेक्षणस्य औत्सर्गिकत्वादेतयैव यजेतामित्याचर्य्यमाण इत्यादि वर्त्तमानवाचिके च प्रत्ययान्तशब्दादिभिः समानकालत्वादविशेषाच्च मलमासेऽपि तादृशकर्मणामारम्भः समापनं च । नित्यनैमित्तिकयोरपि यदनन्यगतिकं पुनर्न कार्य्यम् । तथा च काठकगृह्ये -

'मलमासेऽनन्यगतिकं कुर्य्यान्नैमित्तिकीं क्रियाम् ।'

गृह्यपरिशिष्टेऽनन्यगतिकानि यथा -

'अवषट्कारहोमाश्च पर्व चाग्रयणं तथा ।
मलमासेऽपि कर्त्तव्यं काम्या इष्टीः विवर्जयेत् ।।'

अवषट्कारहोमाग्निहोत्रोपासनवैश्वदेवादयः । काठकगृह्ये -

सोमयागादिकर्माणि काम्यान्यपि मलिम्लुचे ।
षष्टीश्चाग्रयणाधानचातुर्मास्यादिकान्यपि ।।
महालयाष्टकाश्राद्धोपाकर्माद्यपि कर्म यत् ।
स्वस्वमासविशेषस्य विहितं वर्जयेन्मले ।।

तथा च वसन्ते विहितस्य सोमयागस्य मलमासवर्जनेऽपि शुद्धमासेऽनुष्ठान-सम्भवात् सगतिकत्वम् । एवमादिसगतिकनित्यानां वर्जनम् । षष्ठीष्टिः काठकशाखादौ प्रसिद्धा ।

मात्स्ये - आधानं यज्ञकर्माणि प्रायश्चित्तकृतानि च ।
न कुर्य्यान्मलमासेऽपि शुक्रगुरोरुपप्लवे ॥ इति ।

'संक्रान्तिरहिते मासि कुर्य्यादाग्रयणं न वा ' इति पैठीनसिना विकल्पितत्वादाग्रयणस्य सगतिकागतिकयोरुदाहरणं न विरुद्धम् ॥ १० ॥

जातेष्टिं गतिसंयुतां न हि तदा कुर्य्यादथोत्सर्जनं
स्नानादि ग्रहणोदितं त्वगतिकं जन्माद्यशौचं चरेत् ।
प्रसूतिप्रमुखान्नखादनविधिः प्रान्तानि कर्माणि षट्
प्रैतं सर्वमलभ्ययोगविहितं श्राद्धादिकं कर्म च ॥ ११ ॥

जातेष्टेः वक्ष्यमाणेऽशौचेऽवसिते यथानुष्ठानं तथा मलमासेऽप्यवसितेऽनुष्ठातुं शक्यत्वात् सगतिकं नैमित्तिकं च । एवमादिसगतिकनैमित्तिकानां तत्र वर्जनमेव ।

चन्द्रसूर्य्यग्रहे स्नानं श्राद्धस्नानजपादिकं ।
कार्य्याणि मलमासे तु नित्यं नैमित्तिकं तथा ॥

इति यमवचनादगतिकनैमित्तिकानि ग्रहणस्नानादीनि कार्य्याण्येव ।

जन्ममरणाशौचादीनां तदधिकस्य वा चानियामकत्वान्मलमासेऽपि तदाचरणीयम् । तत्र वचनानि तृतीयकाण्डे वक्ष्यन्ते ।

स्मृतिसंग्रहे - नामकर्म च पुंसूतिः सीमन्तोन्नयनं व्रतम् ।
मलिम्लुचेऽपि कुर्वीत निमित्तं यदि जायते ॥

स्मृत्यन्तरे - जातकर्मान्त्यकर्माणि नवश्राद्धं तथैव च ।
श्राद्धजातकनामानि ये च संस्कारसव्रताः ॥
मलिम्लुचेऽपि कर्त्तव्या इष्टीः काम्यश्च वर्जयेत् ।

गौतमः - दानकर्मणि यच्छ्राद्धं नवश्राद्धं तथैव च ।
ग्रहणे पुंसवादौ च तत्पूर्वस्य परस्य च ॥

नवश्राद्धं तु - चतुर्थे पञ्चमे चैव नवमे दशमे तथा ।
यदत्र दीयते जन्तोस्तन्नवश्राद्धमिष्यते ॥

पुंसवादिपदेन पुंसवनसीमन्तोन्नयनजातकर्मनामकरणबर्हिर्निष्क्रमणान्नप्राशनानां षण्णां संग्रहः । तथा च शतानन्दः -

चूडार्वाक् मङ्गलं कर्म मलमासेऽपि कारयेत् ।
तेषां सावनमानेन ऋषिभिः परिकीर्त्तितः ॥

एवं च सति - नामान्नप्राशनं चौलं विवाहं मौञ्जीबन्धनम् ।
निष्क्रामं जातकर्मापि काम्यं वृषविसर्जनम् ॥
अस्तगे च गुरौ शुक्रे बाले वृद्धे मलिम्लुचे ।
उद्यापनमुपारम्भं व्रतानां नैव कारयेत् ॥

इति वृद्धगर्गवचनेन जातकर्मादीनां यो निषेधः स प्राथमिककाले कदाचिदननुष्ठितानां तेषां कालान्तरेऽप्यनुष्ठानपक्षे बोद्धव्य इति सर्वं समञ्जसमिति वदामः ।

बृहस्पतिः - नित्यनैमित्तिके कुर्य्यात् प्रयतः सन् मलिम्लुचे ।
तीर्थस्नानं गजछायां प्रेतश्राद्धं तथैव च ॥

गजछाया तु - यदेन्दुः पितृदैवत्ये हंसश्चैव करे स्थितः ।
याम्यातिथिर्भवेत् सा हि गजछाया प्रकीर्त्तिता ॥

अस्या नैमित्तिकत्वेऽपि पुनर्वचनमेवं जातीयानां महावैशाखीप्रभृतीनां मलिम्लुचे नित्यनिवृत्त्यर्थमिति केचित् । तन्न ।

रोगे चालभ्ययोगे च सीमन्ते पुंसवे तथा ।
यद्ददाति समुद्दिष्टं पूर्वत्रापि न दुष्यति ॥

इति मरीचिवचनात् । तथा च बृहस्पतिवचने गजछायापदं अलभ्ययोगोपलक्षण-मित्यवगन्तव्यम् । अत एव कालादर्शे-

'रोगशान्तिरलभ्ये च योगे श्राद्धतानि च'

इति मलमासे कर्त्तव्यत्वेनोक्तम् ॥ ११ ॥

शुद्धे मासि मलिम्लुये च तनुयाच्छ्राद्धं तु दर्शोदितं
दानश्राद्धविधियोगादिषु तथा श्राद्धादिमन्वादिषु ।
प्रेताब्दोदककुम्भदानमयनो हि प्रेतपक्षाष्टका-
न्वष्टक्यं प्रथितानि जातु मलिने श्राद्धादि कुर्यात्सुधीः ॥ १२ ॥

सर्वं नित्यकर्मणां मासद्वयेन कर्त्तव्यत्वेनोक्तत्वान्मलमासेऽपि दर्शश्राद्धं युगादिश्राद्धदाने काम्यस्यापि मन्वादिश्राद्धस्य 'मन्वादौ च युगादौ च मासयोरुभयत्र च' इति मरीचिवचनादुभयत्राप्यनुष्ठानम्। तत्र युगाद्युपादानं दृष्टान्तत्वेन। तथा च मन्वादिश्राद्धं युगादिश्राद्धवदुभयत्रापि कार्यमित्यर्थः।

कौथुमः - अब्दमम्बुघटं दद्यादन्नं चापि सुसञ्चितम्।
संवत्सरे विवृद्धेऽपि प्रतिमासं च मासिकम्॥

अष्टकाश्राद्धस्य नित्यत्वात् प्रेतपक्षश्राद्धस्य च काम्यत्वादुभयत्र कर्त्तव्यत्वाशंकायां बचनवलात्तयोः शुद्धमास एवानुष्ठानं न हि मले। तथा च महालयाष्टकाश्राद्धेत्यादि काठकगृह्यवचनं पूर्वमुदाहृतम्।

हारीतोऽपि - उपाकर्म तथोत्सर्गं काम्यमुत्सवमष्टकाः।
मासवृद्धौ परा कार्य्या वर्जयित्वा तु पैतृकम्॥

भृगुरपि - वृद्धिश्राद्धं तथा सोममग्न्याधेयं महालयम्।
राज्याभिषेकं काम्यं च न कुर्य्याद् भानुलंघिते॥

नागरखण्डेऽपि- नभो वाऽथ नभस्यो वा मलमासो यदा भवेत्।
सप्तमः पितृपक्षः स्यादन्यत्रैव तु पञ्चमः॥

अत्राषाढीमवधीकृत्य सप्तमपञ्चमौ द्रष्टव्यौ। आषाढ्याः पञ्चमपक्ष इति वचनात्। 'अब्दोदकुम्भमन्वादि महालययुगादिष्वि'ति कालदर्शीयवाक्यगत महालयाश्राद्धेन तीर्थविशेषस्य मघात्रयोदश्यां वा विवक्षितत्वादिति माधवाचार्यः। तस्मादधिमासेऽपि सर्वथा न महालयाश्राद्धं, नाप्यष्टकाश्राद्धं तदनुसन्धित्वादन्वष्टकाश्राद्धमपि कार्यम्॥ १२॥

श्राद्धं मासि मलेऽधिमासविहितं श्राद्धं त्रिपक्षोदितं
षष्ठत्वे सति तस्य पूर्णदिवसाधोऽप्यूनषाण्मासिकम्।
शुद्धे मासि मृतस्य मासि मलिनेऽप्याद्याब्दिकं त्वाचरे -
दन्यद्वार्षिकमाचरेद्धि मलिने नष्टस्य मासे मले॥ १३॥

स्मृतिः - संवत्सरस्य मध्ये तु यदि स्यादधिमासिकम् ।
दद्याद् द्वादशके श्राद्धे कार्यं तदधिकं भवेत् ॥

अगस्तिरपि - एकोद्दिष्टं तु यच्छ्राद्धं तन्नैमित्तिकमुच्यते ।
तत्कार्यं च पूर्वमासेऽपि कालाधिक्ये च धर्मतः ॥

'प्रतिमासं मृताहे चे' ति मरीचिवचनं पूर्वमुदाहृतम् ।

कात्यायनः - यत्र वा तत्र वा षष्ठे मासि षाण्मासिकं भवेत् ।
त्रैपक्षिकं त्रिपक्षे च पूर्णे स्यात्तदनन्तरम् ॥

यत्र वा तत्र वा शुद्धे मलिम्लुचेऽपि वा । तदनन्तरं षट्चत्वारिंशेऽह्नि इत्यर्थः इत्यादि वाक्यपर्यालोचनया षट्चत्वारिंशद्दिवस एवानुष्ठानान्मलमासे त्रैपक्षिकश्राद्धम् । षाण्मासिकमूनषाण्मासिकमित्यर्थः । षण्मासिकान्त क्रियमाणतया तस्य षाण्मासिकसंज्ञेति नारायणभाष्यम् । तथा स एव ।

एकत्वेन तु षण्मासान् यदा स्युरपि च त्रिभिः ।
न्यूनसंवत्सरश्चैव स्यातां षाण्मासिके तदा ॥ इति ।

तथा च प्रथमषण्मासाभ्यन्तरे मलमासप्राप्तेऽपि षष्ठमासपूर्वतिथिरेव प्रथमोन षाण्मासिकस्य काले इति सिद्धान्तितत्वात् । मलेऽपि ऊनषाण्मासिका-श्राद्धानुष्ठानम् । 'यत्र वा तत्र वा, इत्युक्तत्वात् । शुद्धमासमृतस्यापि द्वादशमासस्य' मलत्वे तत्रैव प्रथमाब्दिककरणम् । द्वितीयवर्षाब्दिकं तु शुद्धमास एव न मले । मलमासमृतस्य कदाचित्तस्यैव मासस्य मलत्वे तन्मलमास एवानुष्ठानम् । तथा च

सत्यव्रतः - वर्षे वर्षे तु यच्छ्राद्धं मातापित्रोर्मृतेऽहनि ।
मलमासे न कर्त्तव्यं व्याघ्रस्य वचनं यथा ॥

सत्यतपः - वर्षे वर्षे तु यच्छ्राद्धं मृताहे तन्मलिम्लुचे ।
कुर्यात्तत्र प्रमीतानामन्येषां तु कदाचन ॥

स्मृतिः - आब्दिकं प्रथमं यत्स्यात् तत्कुर्वीत मलिम्लुचे ।

हारीतः - असंक्रान्तेऽपि कर्त्तव्यमाब्दिकं प्रथमं द्विजैः ।

लघुहारीतोऽपि - प्रत्यब्दं द्वादशे मासि कार्या पिण्डक्रिया सुतैः ।
क्वचित्त्रयोदशेऽपि स्यादाद्यं त्यक्त्वा तु वत्सरम् ॥

भृगुः - मलमासमृतानां तु यच्छ्राद्धं प्रतिवत्सरम् ।
मलमासेऽपि तत्कार्यं नान्येषां तु कथञ्चन ॥

विस्तरस्तु कालमाधवीये द्रष्टव्यम् ॥ १३ ॥

नव्यस्त्रीगमनं तथा परिणयानन्तर्यभाङ्नूतने-
न्दोर्वन्दापनमन्त्रनूतनगयाश्राद्धं विदध्यात्सुधीः ।
विघ्नेशव्रतमब्दपर्वविहितं तत्र च ससंर्पके
क्षीणे मासि विवाहमुख्यरहिताः स्मृत्याः श्रुतेश्च क्रियाः ॥ १४ ॥
मासश्चाधिक आश्विने यदि भवेत्तत्पूर्वतोवासरा-
नष्टौ चाधिकमासमेव सकलं शुद्धां च शुक्लाष्टमीम् ।
यावद्व्याप्य शिवार्चनं विरचयेच्चेन्मुख्यपक्षक्षमोऽ-
शक्तः शुद्ध इहाचरेन्नवदिनादिष्वेकपक्षं सुधीः ॥ १५ ॥

स्मृत्यन्तरे - सीमन्तः प्रेतकृत्यं च नवशय्या नवः शशी ।
मलमासेऽपि कर्त्तव्यं निमित्तं विहितं च यत् ॥

वायुपुराणे - अधिमासे जन्मदिने चास्ते च गुरुशुक्रयोः ।
न त्यक्तव्यं गयाश्राद्धं सिंहस्थे च वृहस्पतौ ॥

स्कान्दे गणेशव्रतं प्रति - एकमासं द्विमासं वा षण्मासं वत्सरं तथा ।
अथवा गणनाथस्य व्रतं द्वादशवार्षिकम् ॥ इति

एकमाससमाप्य-द्विमाससमाप्य-षण्माससमाप्य-वर्षसमाप्य-द्वादशवर्षसमाप्येषु पञ्चसु पक्षेषु वर्षसमाप्यव्रतपक्षस्य प्रतिमासं प्रतिशुक्लाचतुर्थी कर्त्तव्यत्वेनाभिहितत्वाद् वर्षमध्ये मलमासपाते त्रयोदशसु मासेषु व्रतं कार्यमेव । क्वचित्त्रयोदशमासाः संवत्सरश्रुतिस्त्रयोदशमासात्मकत्वादपि वर्षस्य । न तु -

षष्ट्या तु दिवसैर्मासः कथितो वादरायणैः ।
पूर्वार्द्धं तु परित्यज्य उत्तरार्द्धं प्रशस्यते ॥ इति

पितामहवचनात् व्रतमुत्तरमास एव कार्यम् । तादृशवाक्यानां संक्रान्तिरहितस्य मलमासस्य उत्तरमासशेषत्वप्रतिपादकत्वात् । काम्यव्रतादिकर्मणामारम्भ-समानविषयत्वाच्च । तथा च -

असूर्या नाम ये मासा न तेषु मम संमतः।
व्रतानां चैव यज्ञानामारम्भश्च समाप्तयः ॥ इति।

तथा चारम्भसमाप्तयोरेवाधिमासे प्रतिषेधः। आरम्भसमाप्तयोर्मध्यपातिन्यधिमासेऽप्यारम्भकर्मणोऽनुष्ठानमेव।

अधिमासे निपतितेऽप्ययमेव विधिक्रमः। इति स्मरणात्।

आरम्भस्य समाप्तेश्च मध्ये यत्स्यान्मलिम्लुचः।
प्रवृत्तमखिलं काम्यं तदानुष्ठेयमेव तु ॥

यदि भाद्रमासेऽधिमासस्तदा शुद्धमासेऽप्यारम्भः। श्रावणे तु समापनस्य विहितत्वात्। भाद्रमासेऽधिमासपातेऽपि समापनेऽपि न कश्चिद्विरोधः। इत्येतद व्रतं संवत्सरसाध्यं चेन्मलमासेऽप्यनुष्ठेयमेवेति सुष्ठूक्तम्। यस्मिन्वर्षे क्षयमासः पतति, तस्मिन् क्षयमासात्पूर्वं द्वित्रेषु मासेषु क्वचिदधिमासो भवति। क्षयमासादूर्ध्वं मासत्रयमध्येऽप्येकोऽधिमास स्तदेवं मलमासत्रयं तेषु त्रिष्वपि विवाहादयो वर्ज्याः। परन्तु श्रौताः स्मार्त्ताः, सर्वाः क्रियाः संसर्पनामके आद्ये मासे अहंस्पतिनामके क्षयरूपे द्वितीयमासे च भवन्ति। तृतीये मासेऽन्यमलमासवद् व्यवस्था। तथा च जावालिः -

एकस्मिन्नेव वर्षे तु द्वौ मासावधिमासकौ।
प्राकृतस्तत्र पूर्वः स्यादुत्तरस्तु मलिम्लुचः ॥

विवाहादाविति प्रकृत्य ज्योतिःशास्त्रे -

यस्मिन् मासे न संक्रान्तिः संक्रान्तिद्वयमेव वा।
संसर्पांहस्पती मासावधिमासश्च निन्दितः ॥

अतएव माधवीये -त्रयस्त्याज्या विवाहादौ संसर्पांहस्पती उभौ।
शुद्धौ श्रौते तथा स्मार्त्ते मलमासे विविच्यते ॥

नन्वेवं सति आश्विनमासेऽधिमासपातश्चेद् दुर्गायाः शरत्पूजोत्सवः कथं भवेदिति चेत् शृणु।'आरम्भस्य समाप्तेश्च' इत्यादि वचनात् षोडशदिनात्मकं मुख्यपक्षेऽनुष्ठेये सार्द्धमासात्मकः शरदुत्सवः कार्य्यः। कथमिति चेत्। 'चैत्रशुक्लादिका मासा' इति न्यायेन दर्शान्तमासपक्षे यो भाद्रपदस्य कृष्णपक्षः स एव पौर्णमास्यन्तमासपक्षे

आश्विनकृष्णपक्षः । तत्र आश्विनमलमासस्य पूर्व कृष्णाष्टम्यादिदर्शान्तं दिनाष्टकं समग्रो मलमासः । शुद्धाश्विनमासशुक्लपक्ष महाष्टम्यन्तं दिनाष्टकं एवं मिलित्वा सार्द्धमासात्मकः शरदुत्सवः । नवदिनादिषु पक्षेषु शक्तेर्न कर्त्तव्येषु सत्सु शुद्धाधीनशुक्लप्रतिपदादावेव समारम्भः कार्यः । नवाहपञ्चाहत्र्यहद्व्यहैकाहरूपाः पञ्चपक्षा तेष्वेकं पक्षमशक्तः कुर्यात् । एतत्पक्षे प्रजापतिः -

उपाकर्म कव्यं हव्यं काम्यं दुर्गोत्सवं तथा ।
उत्तरे नियतं कुर्यात् पूर्वे तन्निष्फलं भवेत् ॥

षोडशाहपक्षे अद्यारभ्य महाष्टमीपर्यन्तमिति संकल्पवाक्ये उल्लेखात् तिथिवृद्धिवन्मासवृद्धावपि न काचित् क्षतिरिति सर्वं सुगमम् । इति कारिकयोः प्रमाणानि ॥ १४-१५ ॥

यद् विष्णौ शयिते व्रतादि गदिते याम्यायने चात्र तत्
कार्यं शारदवाजपेयमितरत्कर्माप्रतीक्षासहम् ।
नारीनूतनसंगमो नवगयाश्राद्धं च गोदावरी
स्नानं नूतनचन्द्रवन्दनविधिः सर्वं परं पूर्ववत् ॥ १६ ॥

विनायकव्रतादीनामाग्रयणादीनां च हरिस्वापदक्षिणायनयोरेवोक्तत्वात् तयोरपि तेषां करणम् । शरद्वाजपेयः कार्यः । एवमितरदगतिकं प्रतीक्षणासह च कर्मापि तत्र कार्यम् । प्रथमस्नानानन्तरं कालविलम्वे वहुदोषश्रवणादनयोरपि नवनारीसंगमः कार्यः । प्रेतपक्षे कालाधिक्यकथनादशुद्धकाले विहितत्वाच्च गयाश्राद्धं कार्यमेव । गोदावरीस्नानस्य सिंहबृहस्पतावेव विहितत्वात् कार्यम् । दम्पत्योर्नवचन्द्रवन्दापनस्य विवाहानन्तरमेव विहितत्वात् समाचाराच्च तदपि कार्यम् । अन्यत् सर्वं मलमासवद् वोध्यम् ॥ १६ ॥

प्राक् पश्चाच्छयनाद्धरेर्वितनुयाद् याम्यायने कर्कट-
स्थेऽर्के तौलिगतेऽलिगेऽपि सदनारम्भप्रवेशो बुधः ।
उद्वाहं तनुयात्तुलौ च निखिले याम्यायने चागतेऽ-
त्युग्राणां नरसिंहमातृगिरिजादीनां प्रतिष्ठाविधिम् ॥ १७ ॥

नित्यनैमित्तिकनिषेधस्य हरिशयन-दक्षिणायनयोरौत्सर्गिकत्वेऽपि-

श्रावणे भृत्यलाभश्च हानिः भाद्रपदे तथा ।

पत्नीनाशस्तथाऽऽश्विन्ये कार्त्तिके स्युर्धनानि च

मार्गशीर्षे भवेद् भक्तं पौषे तस्करतो भयम् ।

इत्यादि मत्स्यपुराणोक्तवचनात् याम्यायनानादरवद्धरिशयनस्याप्यनादरेण श्रावणकार्त्तिकयोर्गृहारम्भप्रवेशप्रसक्तौ -

'आदित्ये चूककर्किक्रियामिथुनघटालिस्थिते'

इत्यादि श्रीनिवासवचनबलेन सौरमानेन एव गृहारम्भप्रवेशयोः सिद्धान्तितत्वात् हरिशयनात् पूर्वं कर्कटमासे प्रतीते तथा हरिशयनोत्तरं तुलमासस्थिते गृहारम्भप्रवेशौ कार्यौ ।

न जातु हरिशयनमध्ये एवं च मत्स्यवचनस्यावकाशत्वे किमिति निषेधोल्लंघनं कार्यमिति संप्रदायविदः । वृश्चिकमासे याम्यायनेऽपि मत्स्यवचनबलेनैव गृहारम्भप्रवेशकरणम् ।। १७ ।।

विवाहविषये ज्योतिशास्त्रे -

वात्स्यो वर्षं मनोजमिच्छति तथा रैभ्योऽयनं चोत्तरं
स्त्रीनामानमृतुं विहाय मुनयो माण्डव्यशिष्या जगुः ।
चैत्रं प्रोज्झ्य पराशरस्त्वकथयत् पौषं च दौर्भाग्यदं
आषाढादि चतुष्टयं न शुभदं कैश्चित् प्रदिष्टं द्विजैः ।। १८ ।।

आषाढे धनधान्यभोगरहिता नष्टप्रजा श्रावणे,
वेश्या भाद्रपदेऽश्विने च मरणं, भोगार्थिना कार्त्तिके ।
पौषे प्रेमवती वियोगबहुला चैत्रे मदोन्मादिनी
शेषेष्वेव विवाहिता सुतवती नारी समृद्धा भवेत् ।।
आषाढादि बहुव्रीहावाषाढः कैश्चिदिष्यते ।
माण्डव्यादिवचो दृष्ट्वा मार्गेशं सन्त्यथापरे ।।

अस्यार्थः - आषाढादिचतुष्टयमित्यत्र आषाढ आदिर्येषां मासानां ते आषाढादयस्तेषां

चतुष्टयमित्यतद्गुणसंविज्ञानो बहुव्रीहिः। तथा च श्रावणादिषु विवाहो न कार्यः। तथा च दक्षिणायनमनादृत्य वृश्चिके विवाहसमाचारः सन्मूलः। 'सौरो मासो विवाहादा' विति वचनादाषाढादिशब्दानां मिथुनादिपरत्वमेवेति वोध्यम्। अगतिकानां पुंसवनादिसूतकाद्यशौचग्रहणस्नानादि नवस्त्रीसंगमचन्द्रवन्दापनादीनां दक्षिणायनमासषट्केऽपि करणम्।

वैश्वानरसंहितायाम्- मातृभैरववाराहनारसिंहत्रिविक्रमाः।
महिषासुरहन्त्री च स्थाप्या वै दक्षिणायने ॥ १८ ॥

जीवेऽप्यस्तमितेऽध्वरादिकरणं शस्तं प्रतिष्ठाव्रत-
क्षौरोद्वाहगृहप्रवेशसदनारम्भा विवर्ज्या हि षट्।
गुर्वादित्य उशन्ति सद्मकरणादीन्यत्र तारुण्यवान्
जीवश्चेदुदितोऽथवाप्यतरुणः त्याज्ये विवाहव्रते ॥ १९ ॥

शतानन्दः - गुरावस्तं गते वर्ज्याः प्रतिष्ठोद्वाहमेखलाः।
गृहारम्भप्रवेशौ च चूडेत्येवं षडेव तु ॥
अग्न्याधेयादिकं सर्वं गुरावस्तंगतेऽपि च।
कुर्वीत तन्निषेधोक्तेरभावादिति निश्चितम् ॥
रविस्थराशिं सन्त्यज्य उदितः स्याद् युवागुरुः।
रविराशिसमेतोऽपि कादाचिदुदितो युवा ॥
गुरावस्तमिते त्याज्यं विवाहं प्राह चाङ्गिराः।
अन्ये तु व्रतमुद्वाहं त्याज्यमाहुर्मनीषिणः ॥
गुरुणा संयुते सूर्ये शुक्रे चास्तमुपागते।
असौम्यदिवसे प्राप्ते व्रतोद्वाहौ विवर्जयेत् ॥
बाले नवदिनं प्रोक्तं वृद्धे चैव चतुर्दश।
बाल्यं वृद्धिं गते जीवे शुभं कर्म विवर्जयेत् ॥

तथा च - गुर्वादित्ये गुरूदयेऽपि कार्यं गृहादि इति गम्यते ॥ इति निबन्धकृतः ॥ १९ ॥

कुर्यात् सिंहबृहस्पतावपि गयाश्राद्धं च गोदावरी
स्नानं पुंसवनादिकान्नकवलान्तानि स्वकालेषु चेत् ।
षट् चाप्यात्ययिकागतिग्रहणकाद्यलभ्ययोगास्तथा ।
नव्यस्त्रीगमनं च सोमयजनाग्न्याधानसोमाध्वरान् ।। २० ।।

शौनकः - स्नानं तीर्थगतिव्रतक्षुरमहादानप्रतिष्ठादिकं ।
सिंहस्थे विबुधार्च्चिते न शुभदं कर्त्तुं तथा सूर्य्यगे ।।

सूर्य्यगे गुर्वादित्ये ।

शातातपः - माघ एव यदा माघी सिंहे चैव यदा गुरुः ।
व्रतं क्षौरं तथोद्वाहं गृहकर्म च वर्जयेत् ।।

शतानन्दः - माघे च माघी चदि पौर्णमासी
तस्यां गतौ सिंहगते च जीवे ।।
नोद्वाहकर्म व्रतकामरूपे
समाचरेद् याम्य दिशि प्रशस्तम् ।।
माघे च यदि माघी स्यान्महामाघः स उच्यते ।
यज्ञोद्वाहौ न कुर्वीत यावत् सिंहगतो गुरुः ।।
महामाघी विनैवाह माण्डव्यः सिंहगे गुरौ ।
विवाहवर्जकर्माणि कुर्यादिति वचः शृणु ।।
श्रुतिवेधव्रतचूडा नवगृहयज्ञप्रतिष्ठाद्याः ।
रविभवनस्थे जीवे कार्या वर्जेतविवाहस्तु ।।

राजमार्तण्डे - यात्रां चूडां विवाहं श्रुतिविवरविधिं नव्यसद्मप्रवेशौ
प्रासादोद्यानहर्म्यामरनरभवनारम्भविद्याप्रदानम् ।
मौञ्जीबन्धं प्रतिष्ठां मणिरदकनकाधारणं कुर्वते ये
मृत्युस्तेषां हरीज्ये गुरुदिनकरयोरेकराशिस्थयोश्च ।।
गुरौ हरिस्थेन विवाहमाहुर्हारीतगर्गप्रमुखा मुनीन्द्राः ।
यदा न माघी मघासंगता स्यात् तदा तु कन्योद्वहनं वदन्ति ।।

मघामृक्षं परित्यज्य यदा सिंहे गुरुर्भवेत् ।
विवाहस्तत्र कर्तव्यो मुनिभिः परिकीर्त्तितः ॥

कल्पतरौ तु देवीपुराणे -

सिंहसंस्थं गुरुं शुक्रं सर्वारम्भे विवर्जयेत् ।
प्रारब्धं नहि सिद्ध्येत महाभयंकरं भवेत् ॥
पुत्रभ्रातृकलत्राणि हन्यात् शीघ्रं न संशयः ।
कारको व्रजते क्षीणं सन्तानं क्षीयतेऽचिरात् ॥
देवारामतडामेषु प्रपोद्यानगृहेषु च ।
सिंहस्थं मकरस्थं च गुरुं यत्नेन वर्जयेत् ॥

इत्यादिना विरुद्धवाक्यैः सिंहबृहस्पतौ विवाहोपनयनादिकरणसंदेहे गुर्वादित्य इत्यादि पूर्वोदाहृतशिष्टवचनबलाद्देशाचारस्तावदादौ विचिन्त्य इति सिद्धान्तितत्वात् अपि वा कारणाग्रहणे प्रयुक्तानि प्रतीयेरन्निति जैमिनीयन्यायाच्च विवाहोपनयनतीर्थयात्रादिकं सर्वथा न कार्यम् ।

अस्मद्देशाचारश्च तथैव । केवलं पूर्वोदाहृतवायुपुराणवचनात् गयाश्राद्धं कार्यम् । गोदावरीस्नानस्य तत्रैव विहितत्वात् सुतरां तत्करणम् । पुंसवनसीमन्तोन्नयनजातकर्मबहिर्निष्क्रमणान्नप्राशनानां संस्कारषट्कर्मणां कालस्य नियतत्वात् तेषां करणम् । निषेधवाक्येषु चूडादीनामेवोक्तवात् केवलं विहितकालेष्वननुष्ठेय उत्कृष्टकालान्तरे तत्करणप्रसक्तौ तानि सर्वथा अननुष्ठेयानि । तत्र तिथिनक्षत्रादिशुद्धिवत् कालेषु शुद्धेरपेक्ष्यत्वात् । तथा कालप्रतीक्षणासहकर्मणामगतिकानां प्रेतकृत्याशौचादीनां ग्रहणाद्यलभ्ययोगाविहितकर्मणां च करणम् । दोषातिशयश्रवणान्नवस्त्रीसंगतिरपि कार्या । 'न ऋतुं न कालं पृच्छेदि' ति कात्यायनसूत्रात् । सोमयागेऽशुद्धकालस्या-निषिद्धत्वात् आचाराच्च सोमः कार्यः । तथा च अग्न्याधानस्य सुतरां करणम् । यागकरणानिषेधोक्तिषु भूतिपुत्राभिचारा हि काम्ययागपरैर्वेति याज्ञिकाः ॥ २० ॥

सन्ध्यास्तंगत वालवार्द्धक्यवशान्नष्टः कविः प्रोच्यतेऽ-
ग्र्याधानाद्यखिलं हि वर्ज्यमुदितं तत्राधिमासे यथा ।
एकश्चेदुदितो युवा दितिसुताचार्य्यामराचार्ययो-
रुद्वाहं प्रविहाय सर्वमितरत् कर्त्तव्यमेके जगुः ।। २१ ।।

भवेत् सन्ध्यागतः पश्चादस्तमेति दिनत्रयम् ।
दिनानि पञ्च पूर्वेण सर्वकर्म विवर्जयेत् ।।
बालो दिनचतुष्कं स्याद् वृद्धः पञ्चाहमिष्यते ।
त्र्यहं सन्ध्यागतः शुक्रस्त्रिधाप्येवं विवर्जयेत् ।।

सन्ध्यागतास्तमितबालवृद्धत्वेषु चतुर्षु शुक्रस्य नष्टत्वम् । तत्र सर्वकर्मविवर्जनम् ।

बृहस्पतिः - बाले वा यदि वा वृद्धे शुक्रे चास्तमुपागते ।
मलमास इवैतानि वर्जयेद् देवदर्शनम् ।।

अत्र मलमासदृष्टान्तोपादानान्मलमासे यावन्निषिद्धं तावत् सर्वमिह निषिध्यते । सकलकाम्यान्यपि वर्ज्याणि ।

तथा - अपूर्वदेवतां दृष्ट्वा शुचः स्यान्नष्टभार्गवे ।
मलमासेऽप्यनावृत्ततीर्थयात्रां विवर्जयेत् ।।

तत्र विचारान्तरमाह शतानन्दः -

गुरुभार्गवयोरेको यदि स्यादुदितो युवा ।
विवाहवर्जमन्यानि कुर्य्यादित्याह चांगिराः ।।
एतदुक्तं भवेदत्र बाले वृद्धेऽस्तगे रवौ ।
अग्र्याधानादिकं सर्वं वर्जयेत् मलमासवत् ।। २१ ।।

श्रीनीलाम्वरराजगुरुराख्याता हरेकृष्णभू -
नाथप्राप्तगजातपत्र तदभूद् यः कौशिकः कोविदः ।
चक्रे योऽपि चतुर्मखादिकमखान् श्रीशुद्धिसारे कृते
तत्पुत्रेण गदाधरेण सुधियो काण्डोऽयमादिर्गतः ।। २२ ।।

अथ द्वितीयकाण्डः

तत्र भूम्यादिद्रव्यशुद्धिः -

वसुन्धरा स्यादशुचिस्त्रिधैवा-
मेध्याऽथ दुष्टा मलिनेति तत्र ।
आद्यान्त्यवासान् मृतिसूतिविष्ठा-
दिभिः शवस्य स्थितितोऽपि दाहात् ॥ १ ॥
दुष्टा मता कुक्कुरसूकरोष्ट्रपादायुधाक्रोष्टखरादिवासात् ।
नखत्वचाङ्गारतुषारभस्मासृक्कनलाद्यैर्मलिनावृताभूः ॥ २ ॥

देवलः - यत्र प्रसूयते नारी म्रियते दह्यतेऽथवा ।
चाण्डालाध्युषितं यच्च यच्च विष्ठादिसंगतम् ॥
एवं कश्मलभूयिष्ठा भूरमेध्या प्रकीर्त्तिता ।
श्वसूकरखरोष्ट्रादि संस्पृष्टा दुष्टतां व्रजेत् ॥
अङ्गारतुषकेशास्थिभस्माद्यैर्मलिना भवेत् ।

शवस्थित्याप्यमेध्या भवति । तत्प्रस्तावे यत्र विन्यस्यते शव इत्युक्तेः । भस्माद्यैरिति नखादीनां पङ्कतृणादीनां चाप्युपलक्षणम् ।

देवलः - नख-दन्त-तनुज-त्वक्-तुषपांशुरजोमलैः ।
भस्म-पंक-तृणैर्वापि प्रच्छन्ना मलिना भवेत् ॥ इति

कारिकयोः प्रमाणानि ॥ १-२ ॥

एवं भूमेरशौचमुक्त्वा शुद्धिमाह-

उल्लेखनक्षालनदुष्टदाहैः गौर्वासकालक्रमणात् क्षितौ च ।
संमार्जनाद गोमयसेकलेपैर्भूमेर्विशुद्धिः खननेन तद्वत् ॥ ३ ॥
चाण्डालसंस्था शवदाहयोस्तैः सर्वैरथ विस्मृतिसूतियोगे ।
गोक्रान्तकालक्रमसेकलेपैः श्ववायसानां क्रमणेऽपि शुद्धिः ॥ ४ ॥
सा कुक्कुटोष्ट्राक्रमतोऽम्बुसेकाद्युल्लेखनाच्च क्षितिरेति शुद्धिम् ।
अङ्गारभस्मास्थिकचादियोगेतूल्लेखनाच्छुद्धिमुपैति भूमिः ॥ ५ ॥

यथार्हमन्येष्वपि कलनीया सेकेऽम्बुगोमूत्रतया विकल्पः ।

सम्मार्जनं गोमयलेपनं च भूशुद्धिमात्रे विहितोऽप्यवश्यम् ॥ ६ ॥

यमः - खननात् प्लवनाद् दाहाल्लेपनादतिघर्षणात् ।

गोभिराक्रमणात् कालाद् भूमिः शुद्ध्यति सप्तधा ॥

तत्प्रस्तावे देवलः - 'पर्जन्ये वर्षणं चेति' । जातुकर्ण्यः-सेकादुल्लेखनादिति । लेपनं तु गोमयोदकेन ।

शुद्ध्येद् गोमयलेपनादिति बोधायनोक्तेः ।

मृदन्तरेणापीति शिष्टाः इति सामान्येन भूशुद्धिः ।

तत्र शुद्धिविभागमाह देवलः -

पञ्चधा वा चतुर्धा वा भूरमेध्या विशुद्ध्यति ।

दुष्टान्विता त्रिधा द्वेधा शुद्ध्यते मलिनैकधा ॥

तथा - खननाद्दहनाच्चैव उपलेपनपूरणात् ।

पर्जन्यवर्षणाच्चैव भूरमेध्या विशुध्यति ॥

चाण्डालावस्थितौ शवदाहनियमः नान्यत्र स्थले । अस्मत् कारिकासु विशिष्य यदुक्तं तन्निबन्धकारलिखनात् । 'सेकश्चोदकेन गोमूत्रेण वा' इति उल्लेखनादिशुद्ध्यनन्तरं वा मार्जनं गोमयलेपनेन सर्वत्र कार्यम् । सम्मार्जनेनाञ्जनेनेति सामान्योक्तेः । अञ्जनं गोमयलेपनमिति टीकाकारः । इति कारिकाचतुष्कस्य ॥ ३- ६ ॥

गोऽग्न्यर्चिरालोकनतक्षणार्करश्मिप्रवेशो अथवा विशुद्धौ ।

स्याद् वेश्मनः प्रत्यहमेव शुद्धिः सम्मार्जनाद् गोमयलेपनाच्च ॥ ७ ॥

भूशुद्ध्यनुवृत्तौ मेधातिथिः -

'अतिशयोपघाते तक्षणसूर्यरश्म्यनुप्रवेशगोऽग्निज्वालादर्शनमिति गृहं मार्जनलेपनादि'ति याज्ञवल्कीये पृथगुपादानात् । प्रत्यहं तयोः क्रियेति विज्ञानेश्वराः ॥७॥

गोस्थानविप्रालयदेववेश्म क्षितिः सुधा लेपवती च भूमिः ।

मेध्या सदा तत्र तु सौधमम्बु प्रक्षालनं शुद्धियुतं क्रियार्हम् ॥ ८ ॥

यमः -	‘ब्राह्मणावसथे भूमिर्गवां गोष्ठे तथैव च’

मेध्येति शिष्टाः।

ब्राह्मणावसथे भूमिर्गवां गोष्ठे च या भवेत्।
मेध्या वै सर्वदा भूमिर्देवागारे तथैव च ॥

देवागारस्य शुद्धत्वोक्त्या सुधालेपस्यापि शुद्धत्वमुक्तम्। गोमयलिप्त इव सुधालिप्तेऽपि शुद्ध्यनपायात्।

तत्र एव मनुः - मार्जनोपाञ्जनैर्वेश्मेति। अञ्जनं सुधागोमयादिभिर्लेपनमिति मेधातिथिः। चूर्णस्यास्थिमयत्वात् पञ्चनखव्यतिरिक्तानां क्षालनादेव शुद्धेः कर्मार्हत्वम् ॥ ८ ॥

महोपघाते सुरसद्मशुद्धिरुल्लेखनाद्यैरुदितैर्यथार्हम्।
भूमिसमत्वं बहुबाहुदारुपलेषु संकीर्णकृतेऽष्टकासु ॥ ९ ॥

देवगृहविषये तदनुगृहीतविषयम्। उपघाते तु वाह्ने-

देवानां प्रतिमाश्चापि वेश्मान्यायतनानि च।
शुद्ध्येयुस्तोयगोभिश्च दाहोल्लेखनमार्जनैः ॥

सेचनायाश्च मन्त्रैस्तु सलिलैः पञ्चभिश्च भूरित्यत्र समन्त्रसेचनं प्रतिमायोग्यविषयत्वादिति वक्ष्यते। अन्यद्गृहादिविषयम्। अत्राचार्याः -

‘केवलं काष्ठादिदेवगृहेषु न दाहः। पाषाणादिगृहेषु वक्ष्यमाणतक्षणादिभिः शुद्धि’रिति यथायोग्यं विचार्य शुद्धिर्विधेया।

बौधायनः -	‘अनेकोद्वाह्ये दारुशिले भूमिसमे इष्टकाश्च संकीर्णीभूताः।’

अनेकैरेव पुरुषैरुत्तोलयितुं यत्र दारुशिलानां शक्तिरित्यर्थः ॥ ९ ॥

ग्रामाद् बहिः दण्डशतं विहाय पुरात्तथा दण्डचतुःशतानि।
सर्वत्र मेध्या गदिता धरित्री लेपः परं तत्र न विद्यते चेत् ॥ १० ॥

मनुः -	ग्रामाद् दण्डशतं त्यक्त्वा नगराच्च चतुर्गुणम्।
भूमिः सर्वत्र शुद्धा स्याद् यत्र लेपो न विद्यते ॥

पक्वेष्टका संघटितापणादिरथ्याम्बुपंकाः पदवी तथैव ।

स्पृष्टा अपि श्वान्त्यजवायसाद्यैः शुद्धा मरुच्चन्द्रदिवाकरैस्तु ॥ ११ ॥

याज्ञवल्क्यः - रथ्याकर्दमतोयामि स्पृष्टान्यन्त्यश्ववायसैः ।
मारुतेनैव शुद्ध्यन्ति पक्वेष्टकचितानि च ॥
पन्थानश्च विशुद्ध्यन्ति सोमसूर्य्यांशुमारुतैः ॥
इति ।(१-१९७,१९४)

अन्त्यश्चाण्डालः ॥ ११ ॥

ज्ञातौ मृते स्वर्णकुशोदकाभ्युक्षणाद् गृहं शुद्धिदिने विशुद्धम् ।

गृहे प्रविष्टेऽन्त्यजनेऽश्मभूम्योः शुद्धिः सुधागोमयलेपनाभ्याम् ॥१२॥

गते दशाहे स्वमृतौ विशुद्धं मासेन शूद्रस्य मृतौ गृहं स्यात् ।

आवामुभाभ्यां पतितस्य मृत्यामन्त्यो मृते मासचतुष्टयेन ॥ १३ ॥

विप्रे मृते वेश्मदिनत्रयेण गतेन शुद्धिं च विलेपनाद्यैः ।

श्वादेर्वहिश्चेन्मरणं दिनेन त्याज्यं गृहं तत्तदशुद्धिबालान् ॥ १४ ॥

देवलः - ब्राह्मणो मृतबन्धुश्च सुवर्णकुशवारिणा ।
सर्वमभ्युक्षयेद् वेश्म ततः शुद्ध्येदसंशयः ॥

मरीचिः - गृहे स्वजातिसंवेशे शुचिः स्यादुपलेपनात् ।
उपलेपनं पाषाणवत् गृह्ये क्रमेण सुधागोमयाभ्याम् ।

बृहस्पतिः - दशरात्रात् शुनि प्रेते मासे शूद्रे भवेच्छुद्धिः ।
द्वाभ्यां च पतिते गेह अन्त्ये मासचतुष्टयात् ।
तावत्तु वर्जयेद् गेहमित्येवं मनुरब्रवीत् ॥

द्वाभ्यां मासाभ्यामित्यर्थः ।

यमः - द्विजस्य मरणे वेश्म विशुद्ध्येत दिनत्रयात् ।
दिनैकेन बहिर्भूमिरग्निप्रोक्षणलेपनैः ॥

यथोक्तकालान्ते प्रोक्षणादिना शुद्धिः न तक्षणादिनेत्यर्थः ।

इति त्रयस्य भूशुद्धिः ॥ १२-१४ ॥

जलशुद्धिः

निजेन रूपेण रसेन युक्तं गोतृप्तियोग्यं शुचिशुद्धभूस्थम् ।
व्योमस्थितं शुद्धमथैव दैवं गोतर्पकं चाचमनीयमम्वु ॥ १५ ॥
अप्युद्धृतं वारिविशुद्धमुक्तं शुद्धेन पात्रेण समुद्धृतं चेत् ।
विशुद्धमप्यम्वु यदेकरात्रोषितं भवेच्चेन्नहि तद्विशुद्धम् ॥ १६ ॥
गोपानसंक्षीणसमाम्भोसोऽन्यदप्येकरात्रोषितमम्वु पेयम् ।
स्नानाय योग्यं च परं नु देवाभिषेकपूजादिषु नेति वृद्धाः ॥ १७ ॥
गंगाजले पर्युषितेऽपि शुद्धिर्विष्ण्वादिपादोदक एवमाहुः ।
असम्भवे पर्युषितं तु माघे स्नानेऽम्वुवाताहतमाददीत ॥ १८ ॥
त्र्यहोत्तरं प्रावृषि मेघतोयं शुद्धं दशाहोत्तरतोऽन्यकालम् ।
दशस्वहःस्वेव गतेषु नीरं शुद्धं भवेन्नूतनखातजातम् ॥ १९ ॥
जान्वादिदघ्नाम्भसि पुष्करिण्यादौ सेतुकूपह्रदवापिकादौ ।
अन्त्यैः कृतेऽप्यापदि वान्यनीराभावेन दोषस्तदसंग एव ॥ २० ॥
सर्वेषु कूपादिजलाशयेषु दोषेऽल्पविष्ठादिकयोगरूपे ।
शताम्बुकुम्भोद्धृतिपूर्वकञ्च गव्यप्रणिक्षेपणतो विशुद्धिः ॥ २१ ॥
कूपे यदा पञ्चनखस्य मृत्युः प्रभूतमद्यास्रविडादियोगः ।
उद्धृत्य सर्वं जलमंशुकेन प्रोक्ष्य क्षिपेत्तत्र च पञ्चगव्यम् ॥ २२ ॥
पक्केष्टकासंघटिते विशेषः कूपेऽनलज्वालनमेव भूयः ।
चराचरेष्वम्बुषु शुद्धिरेवं महत्सु दोषो न जलाशयेषु ॥ २३ ॥
शुद्ध्यन्ति नद्यः खलु वेगवत्यो वेगेऽपि दुष्यन्ति मलोपलिप्ताः ।
जलावतारे यदि विट्शवादेः पातोऽन्यतीर्थाज्जलमाददीत ॥ २४ ॥
जलाशयाभ्यासगसत्रपातान्निपानतश्चर्मपुटात्पापायाः ।
दत्तं द्विजेनापि जलं न पेयं मरौ विपत्तौ क्षितिगन्तुपेयम् ॥ २५ ॥

विष्णुः - भूमिष्ठमुदकं शुद्धं वितृष्णा यत्र गौर्भवेत् ।
अव्याप्तं चेदमेध्येन तद्वदाकाशसंस्थितम् ॥

याज्ञवल्क्यः(१-१९२) - 'शुचिगोतृप्तिकृत्तोयं प्रकृतिस्थं महीगतम्।'
प्रकृतिस्थं रूपसान्तरमनापन्नाम्। महीगतं - शुद्धं भूमिष्ठम्।
आकाशस्थमपि गोतृप्तिक्षमं चेत् शुद्धं पूजनार्हम। आचमनार्हम् च।

दिवा सूर्यांशुभिस्तप्तं रात्रौ नक्षत्रमारुतैः।
सन्ध्ययोरप्युभाभ्यां च पवित्रं सर्वदा जलम्॥ इति

यमवचनमनुपहतविषयम्।

देवलः - उद्धृता अपि शुद्ध्यन्ति शुद्धैः पात्रैः समुद्धृताः।
एकरात्रोषिता आपस्त्याज्या शुद्धा अपि स्वयम्॥

विष्ण्वादिपादोदकं पर्युषितमपि ग्राह्यं प्रसादत्वात्। 'पादोदकं च निर्माल्यं नैवेद्यं च विशेषतः।' प्रसाद इत्युक्तत्वात्। 'तस्य एकरात्रे' त्यादि वाक्येन नाप्यशुद्धिः। किन्तु 'अक्षीणाश्चैव गोपानादापः शुचिकराः स्मृताः।' इति सामान्यतो शुद्धिकरत्वं तत्रैव पर्युषितं पर्युदासो न कार्यान्तरे। नापि यज्ञपात्रप्रोक्षणार्थं जलवत् संस्कारविशेषाधानशुद्धिहेतुत्वेऽपि। 'एवं न नक्तोदकपुष्पाद्यैरर्चनं स्नानमिष्यते'। इत्यनेनापि देवार्चनस्नानयोरेव पर्युषितजलनिषेधो न स्नाने। एतेन पर्युषितजलपानेऽपि दोषाभावो दर्शित इति प्राचीनाः।

नद्यास्तु 'विष्णुपादोदकं मूर्ध्नि कल्यमुत्थाय धारयेत्' इति वचनात् पादोदकस्य कल्ये ग्रहणविधानात् पर्युषितस्यैव कल्ये सम्भवत्वात्। एकरात्रोषिता इति न निषेधस्याप्रवृत्तिः। यत्तु नक्तोदकादिनैव पूजनदेवस्नानयोरेव पर्युषितजलनिषेधो न यस्य स्नानादाविति तन्न।

देवस्यार्चनपदेनैव स्नाननिषेधो स्नानपदस्य स्वस्नानपरत्वौचित्यात् इति तन्न सम्यगिति प्रतीमः। एतद् वाक्यस्य केवलदेवविषयत्वात्। यदि स्वस्नानस्य विवक्षा स्यात् तर्हि उदकस्नानयोः पौर्वापर्यविपर्यासो न संगच्छेत्। आद्यपदोपादानमप्यसंगतं स्यात्। देवविषयत्वे तु आद्यपदेन चन्दनादेः परिग्रहः। माघस्नानेऽपि रात्रिजलस्य वाचनिकत्वात्। अस्मद् देशे बृहद्भाण्डस्थापितपर्युषितजलेन

स्नानपानव्यवहारदर्शनाच्चेति ।

वर्ज्यं पर्युषितं पुष्पं वर्ज्यं पर्युषितं जलम् ।
न वर्ज्यं जाह्नवीतोयं न वर्ज्यं तुलसीदलम् ।।

इति ब्रह्माण्डपुराणोक्तगंगाजले न पर्युषितत्वदोषः । विष्णुपादोदकेऽपि न । विष्णुपादोदकं मूर्ध्नि इति वाक्यात् । माघस्नाने तु -

सरितामप्यभावे तु नवकुम्भस्थितं जलम् ।
वायुना ताडितं रात्रौ गंगास्नानसमं विदुः ।। इति

पर्युषितत्वाभावः स्मृत्यन्तरे -

काले मेघोदकं ग्राह्यं वर्ज्यं त्रिदिनमेव च ।
अकाले दशरात्रं स्यात्ततः शुद्धिर्विधीयते ।।

यमः - अजा गावो महिष्यश्च ब्राह्मणी च प्रसूतिका ।
दशरात्रेण शुद्ध्यन्ति भूमिष्ठं च नवोदकम् ।। इति ।

ब्राह्मे - नवखातस्थितं वारि दशरात्रेण शुद्ध्यति ।

अङ्गिराः - चण्डालपरिगृहीतं योऽज्ञानादुदकं पिवेत् ।
शुद्धिर्विजानीयाद् प्राज्ञः प्राजापत्येन नित्यशः ।।

एतदन्त्यजस्वामिकं तदुपभोगसंस्पृष्टाम्बुविषयम् ।

आपस्तम्वः - अन्त्यजैः खानिताः कूपास्तडागा वाप्य एव वा ।
एषु स्नात्वा च पीत्वा च प्राजापत्यं समाचरेत् ।।
म्लेच्छादीनां जलं पीत्वा पुष्करिण्यां ह्रदेऽपि वा ।
जानुदघ्नं शुचिर्ज्ञेयमधस्तादशुचिः स्मृतः ।।

जानुदघ्नादधस्तात् म्लेच्छजलाशयोऽशुद्धः । एतदनापद्यपि अन्त्यजकृतेऽपि तडागादौ संपर्काभावात्तदुत्सृष्टे वा आपदि जलान्तरमसम्भवे वचनाददोषः । तथा च शातातपः -

अन्त्यैरपि कृते कूपे सेतौ वाप्यादिके तथा ।
तत्र स्नात्वा च पीत्वा च प्रायश्चित्तं न विद्यते ।।

स्मृत्यन्तरे - वापीकूपतडागेषु दूषितेषु सरस्सु च।
उद्धृत्य वै कुम्भशतं पञ्चगव्येन शुद्ध्यति ॥

आपस्तम्वः - उपानच्छ्लेष्मविण्मूत्रेऽस्थि रक्ते मद्यमेव च।
एभिश्च दूषिते कूपे कुम्भानां शतमुद्धरेत् ॥

इदमल्पोपहतविषयम्। अत्यन्तापहतविषये तु विष्णुः -

मृतपञ्चनखात् कूपादत्यन्तोपहता तथा।
आपः समुद्धरेत् सर्वाः शेषं वस्त्रेण प्रोक्षयेत् ॥
वह्निप्रज्वालनं कृत्वा कूपे पक्वेष्टकाचिते।
पञ्चगव्यं न्यसेत् पश्चान्नवतोयं समुद्धरेत् ॥
जलाशयेषु सर्वेषु स्थावरेषु चरेषु च।
कूपवत् कथिता शुद्धिर्महत्सु च न दूषणम् ॥

अतएव न दुष्यतीत्यनुवृत्तौ 'नापो मूत्रपुरीषाभ्यामि'ति याज्ञवल्कीयं महाजलाशयपरम्।

पराशरः - नदी वेगेन शुद्ध्यति यत्र लेपो न विद्यते।

देवलः - 'कश्मलाशुचियुक्तानि तीर्थतः परिवर्जयेत्।'

कश्मलं शवादि। तथा च जलावतरणं शवाद्यशुचियोगादशुद्धं चेत्तर्हि जलावतरणानन्तरं जलं ग्राह्यमित्यर्थः।

कश्मलानि देवलेन परिभाषितानि-
मानुषास्थिशिरोविष्ठारेतोमूत्रार्त्तवानि च।
कुणपः पूयमित्येतत् कश्मलं समुदाहृतम् ॥

यमः - प्रपामरण्ये घटकं च कूपे द्रोण्यां जलं कोषगतास्तथापः।
ऋतेऽपि शूद्रात्तदपेयमाहुरापद्गता भूमिगताः पिवेत्तु ॥

प्रपा - पानीयशालास्थजलम्। घटकोऽत्र कूपादौ सर्वसाधारणजलोद्धरणपात्रं कलशोदितजलं द्रोणीकाष्ठाद्यम्वुबहिर्निपानमित्यर्थः। कोषश्चर्मपुटः। शूद्रावृत्तमपि द्विजस्वामिकमपि प्रपादिजलमित्यर्थः। आपद्गत इति मरुदेशीयानां शिष्टानामपि विपत्तौ तत्पानसमाचारः। इत्येकादशकारिकासु ॥ १४-२५ ॥

मासद्वये कर्कटकादिकेऽपि साक्षात् समुद्रोपगताः स्रवन्त्यः ।
त्र्यहोत्तरं कर्कटसंक्रमाः स्युः शुद्धा आपो जह्नुसुता तथैव ।। २६ ।।
रजोभिः दुष्टा यमुनापि न स्यात्तथा कुरुक्षेत्रसरस्वती च ।
नदेषु शोणप्रभृतिष्वपि स्यान्मासद्वयेऽस्मिन्नपि नैष दोषः ।। २७ ।।
मासद्वयेऽत्र रजस्वलात्वदोषोऽप्युपाकर्मणि निम्नगानाम् ।
उत्सर्गप्रेताभिषजार्कचन्द्रग्रहेषु नद्येऽपि दिनत्रये स्यात् ।। २८ ।।
जलान्तरासम्भव एव तासु न स्याद्रजो दोष इतीह केचित् ।
ग्राह्यं रजस्यप्युदकं घटाद्युदध्नतं स्वभोगे तु ह्रदाद्यभावे ।। २९ ।।

कात्यायनः - मासद्वयं श्रावणादि सर्वा नद्यो रजस्वलाः ।
तासु स्नानं न कुर्वीत वर्जयित्वा समुद्रगाः ।।

समुद्रगाः साक्षात् प्रत्यभिमानसमुद्रप्रवेशाः । समुद्रगापदं भागीरथ्यादिपयोष्णिकान्तासु द्वादशसु नदीषु एव प्रवर्त्तत इति अतिप्राचीनास्तन्न । समुद्रगापदस्य प्रसिद्धयोगत्यागेन अप्रसिद्धरूढकल्पनायां मानाभावात् ।

आद्यौ कर्कटके नद्यः सर्वा एव रजस्वलाः ।
त्रिदिनं तु चतुर्थेऽह्नि शुद्धाः स्युर्जाह्नवी यथा ।।

तेन समुद्रगा इति वचनात् समुद्रगानामपि त्रिरात्रात् शुद्धिर्न । गंगायाः शुद्धौ दृष्टान्तत्वेन प्रतिपादनात् । वचनं च -

गंगा च यमुना चैव प्लक्षजाता सरस्वती ।
रजसा नाभिभूयन्ते ये चान्ये नदसंज्ञकाः ।।

प्लक्षजाता कुरुक्षेत्रस्थिता सरस्वती ।

पुनः कात्यायनः - उपाकर्मणि चोत्सर्गे प्रेतस्नाने तथैव च ।
चन्द्रसूर्यग्रहे चैव रजोदोषो न विद्यते ।।

जलान्तरासम्भवेन रजोदोषो इति कालादर्शकारः । अत एव दोषो न तत्तीरवासिनामिति मदनपारिजातोद्धृतनिगमस्मतिरपि तत्परैव । तेन विशेषविधानादवैगुण्यम् ।

अभावे कूपवापीनामन्येनापि समुद्धृते।
रजो दुष्टेऽपि पयसि ग्राम्यभोगो न दुष्यति ॥
अन्येनापि घटादिना। इति कारिकाचतुष्कस्य ॥ २६-२९ ॥
मृत्सप्तपिण्डोद्धरणाद् विशुद्धं जलं तडागेऽन्यकृतेऽथ कूपे।
नक्तं त्रिपिण्डोद्धरणात्तु पञ्चपिण्डोद्धृतैरन्यजलाशयेषु ॥ ३० ॥
त्रिकुम्भपिण्डत्रिरात्रं चोद्धृताभ्यां निरुद्धवेगासु नदीषु शुद्धिः।
त्रिनीरकुम्भोद्धरणेन कूपस्याम्भः परस्यापि शुद्ध्यन्ति केचित्॥ ३१॥
स्नानेऽपि पित्रादिकतर्पणादावसम्भवे स्यान्न तु सर्वदैतत्।
क्रीते गृहीतेऽम्बुनिपानखात वृद्धा न पिण्डोद्धरणं वहन्ति ॥ ३२ ॥
नद्यास्तु विक्रीतजलेऽन्यदीये निम्नप्रदेशस्थितवृष्टिनीरे।
नद्यास्तु भङ्गादिकृतोऽन्यभूमिर्गर्त्तास्तु पिण्डोद्धरणं न चाहुः ॥३३॥
चतुर्भिः कुलकम्।

योगीयाज्ञवल्क्यः- परकीयनिपानेषु यदि स्नायात् कदाचन।
सप्तपिण्डान् समुद्धृत्य ततः स्नानं समाचरेत् ॥

शंखलिखितौ - स्नायात् तडागोदकनिपानकूपेषु।
सप्त पञ्चपिण्डानुद्धृत्य देवपितॄंश्च तर्पयेत् ॥

बौधायनः - स्रवन्तीष्वनिरुद्धासु त्रयो वर्णा द्विजातयः।
प्रातरुत्थाय कुर्वीरन् देवर्षिपितृतर्पणम् ॥
निरुद्धासु न कुर्वीरन्नंशभाक् तत्र सेतुकृत्।
तस्मात् परकृतान् सेतून्कूपांश्च परिवर्जयेत् ॥
उद्धृत्य वा त्रीन् पिण्डान् कुर्य्यादापत्सु नो सदा।
निरुद्धासु तु मृत्पिण्डांस्तान्त्रीनम्बुघटांस्तथा ॥

अत्रेयं व्यवस्था। परकृततडागेषु शंखलिखितयोगीयाज्ञवल्क्यवचनाभ्यां सप्तपिण्डोद्धरणम्। कूपतडागातिरिक्तजलाशये शंखलिखित-याज्ञवल्क्यवचनैः पञ्चपिण्डोद्धरणम्। परकृतकूपेषु पिण्डत्रयोद्धरणम्। प्रवाहसेतुकरणेन जलाधिक्यं

यत्र तत्र मृतपिण्डत्रयोद्धरणं अम्बुघटत्रयोद्धरणं च। कूपे तु कूपात् त्रीन् घटांस्तथेति वचनान्तरादम्बुघटत्रयोद्धरणमात्रेण शुद्धिरिति केचित्।

क्रीतप्रतिगृहीतपितृकृतजलाशयेषु न निषेधो न च पिण्डोद्धरणमिति वृद्धाः। तत्र युक्तिमाहुः। न च परकीयपदस्य वाक्यशेषबलेन परकृतपरत्वात्तत्रापि निषेधपिण्डोद्धरणे स्यातामिति वाच्यम्। परकीयपदस्याजहल्लक्षणया निपानकर्त्तुः परसम्बन्धिपरत्वं भवेत्। जहल्लक्षणया परकृतमात्रपरत्वस्यान्याय्यत्वात् इति। नद्यस्तु परनिपानेषु न स्नायात्। आचरेद् वा पञ्चपिण्डानुद्धृत्यापदीति विष्णुस्मृतौ परनिपानपदं परनिपानकर्त्तृपरम्। तथा च मनुः(४-२०१) -

परकीयनिपानेषु न स्नायाच्च कदाचन।
निपानकर्त्तुः स्नात्वा तु दुष्कृतांशेन लिप्यते ॥ इति।

अत एव स्वकृततडागादौ विक्रयादिना परकीये, नदीसेतुभंगादिना गर्ते परकीये जाते परकीयनिम्नभूमौ वर्षैकपूर्णजलस्य परकीयत्वेऽपि परकृतत्वाभावान्न पिण्डोद्धरणम् इति कारिकाचतुष्टयस्य ॥ ३०-३३ ॥

ये विन्दवोऽप्याचमनोदकस्य क्षितिं प्रविष्टा प्रयता मतास्ते।
यत् पातुरन्याचमनार्थमम्भः पादौ स्पृशेत्तच्छुचिभूमितुल्यम् ॥ ३४ ॥
ये श्लेष्मविन्दुप्रकारा मुखोत्था रोमद्वयार्द्रीकरणाः समद्याः।
अंगेषु ते संपुटिता अपि स्युः शुद्धा न यत्राचमनाद्यपेक्षा ॥ ३५ ॥
प्रक्षालनोच्छिष्टं जलं धरायां विस्राव्यदाचम्यमसम्भवे स्यात्।
अशुष्कनद्याः प्रथमेऽपि वेगे नीरं विशुद्धं निगदन्ति वृद्धाः ॥ ३६ ॥
भोज्यान्नशूद्रैरुदकादि दत्तं देशेऽस्मदीये त्वविगीतमेव।
सर्वेषु कर्मस्वपि तन्नियोज्यं निन्दा यतः स्वाहृतरोचनार्थाः ॥३७॥

पैठीनसिः - भूमिगता विन्दवः परामृष्टाः पूतनाः विप्रुषः शुद्धाः।
द्विरोमक्लिन्नेष्वाचमेत् इति।

परामृष्टा स्पृष्टाः पूतना पायन्वहेतवः। विप्रुषो मुखविन्दवोऽङ्गे निपतिता अपि रोमद्वयार्द्रभावमापादयितुं समार्था एव आचमननिमित्तं भवन्ति। अन्या अशुद्धा

इत्यर्थः। अत एव मनुः (५-१४१)-

'नोच्छिष्टं कुर्वते मुख्या विप्रुषोऽङ्गं नयन्ति याः'।

याज्ञवल्क्येऽपि(१-१९५) -

'मुखजा विप्रुषो मेध्यास्ताथाऽऽचमनविन्दवः'।

मुखजा विन्दवः श्लेष्माविन्दवः इति विज्ञानेश्वराः।

मनुः (५-१४२)- स्पृशन्ति विन्दवः पादौ य आचमयतः परान्।

भौमिकैस्ते समाज्ञेया न तैरप्रयतो भवेत्॥

अन्येषामाचमनार्थं जलं ददतो यो जलविन्दवः। पादौ स्पृशन्ति शुद्धभूमिगतेनोदकेन तुल्यां इति अनन्तभट्टव्याख्या।

बौधायनः - पादक्षालनाच्छेषं नाचमेत्। भूमौ श्रावयित्वाऽऽचमेत्।

याज्ञवल्क्यः - न ग्राह्यास्ताप आपो नद्याः प्रथमवेगिताः।

इत्यत्र प्रथमवेगितानिषेधः शुष्कनदीविषय इति लक्ष्मीधरः। भोज्यमानैर्नापितादि-शूद्रैर्दत्तमुदकमस्मद्देशे निपानं पिबन्ति पूजादिष्वपि नियुज्यते।

कुशपुष्पसमिद्धानि ब्राह्मणः स्वयमाहरेत्।

शूद्रानीतैः क्रयक्रीतैः कर्म कुर्वन् पतत्यधः॥

इति वाक्यस्य स्वयमाहृतजलादिप्राशस्त्यपरत्वम्। न तु शूद्रानीतजलनिषेध-परत्वम्।

'यथाऽपशवो वान्ये च गोऽश्वेभ्यः इत्यत्र नहि निन्द्यो निन्द्यं निन्दितुं प्रवर्तते, अपि तर्हि स्तुत्यं स्तौति' इति न्यायेन गवादीनां प्रशस्तपशुत्वं न त्वजादीनां पशुत्वनिषेधस्तद्वदित्याहुः। एवं पुष्पादिकमपि पूजादिष्वपि नियुज्यते॥ ३४-३७॥

अथ द्रव्यशुद्धिः

कीटादिपाते निखिले द्रवाणां शुद्धेर्मते वोत्पवनात्तु तेषाम् ।

आच्छाद्य यद्गालनमंशुकेन विज्ञैस्तदन्तोत्पवनं निरुक्तम् ।। ३८ ।।

कीटाद्युपघाते मनुः (५-११५) - द्रवाणां चैव सर्वेषां शुद्धिरुत्पवनं स्मृतम् ।

उत्पवनं चात्र द्रवाणां वस्त्रेणाच्छाद्य गालनम् । अन्यथा कीटाद्यपगमस्या-सम्भवत्वात् इति विज्ञानेश्वरादयः ।। ३८ ।।

प्रस्थप्रमाणादधिकद्रवस्य त्वमेध्यकालादिकयोगादौष्णे ।

संघतकस्यास्त्रीमज्जनेन शुद्धिर्मता प्लाव इदं सपात्रम् ।। ३९ ।।

यज्जातिकः स्यादशुचिद्रवौघस्तज्जातिकेनैतदमन्त्रपूर्त्तौ ।

यत्तद्द्रवस्योद्वलनं समुक्तं प्लावोऽस्य नवेति शुचित्वमेने ।। ४० ।।

अस्थ प्रस्थप्रमाणादधिकः द्रवौघः स एवंविधलक्षणेन प्लावेन एते विज्ञानेश्वरादयः ।

याज्ञवल्क्यः(१-१९०)- ''शुद्धिः प्लावो द्रवस्य च'' ।

अत्र विज्ञानेश्वराः - द्रवद्रव्यस्य घृतादेः प्रस्थप्रमाणाधिकस्य श्वकाकाद्युपहतस्य अमेध्यसंस्पृष्टस्य च प्लावः प्लावनं समानजातीयेन द्रवद्रव्येण भाण्डस्याभिपूरणं यावन्निःसरणं शुद्धिरित्यनुवर्त्तते । ततोऽल्पस्य त्याग एव । इदं देशकालाद्यपेक्षया वेदितव्यम् ।

यथा बौधायनः(८-४८)- देशं कालं तथात्मानं द्रव्यं द्रवप्रयोजनम् ।

उपपत्तिमवस्थां च ज्ञात्वा शौचं प्रकल्पयेत् ।।

देशाद्यपेक्षयेति यदुक्तं तत्सर्वस्यामपि शुद्धौ वेदितव्यम् । अत्र केचित् अधिकद्रव्यस्याशुद्धरान्तरे जले भाण्डस्यैव मज्जनमिति । तथा च ब्राह्मे 'देवद्रव्याणि भूरिणी परिप्लावानि चाम्भसा' इति कारिकयोः ।। ३९-४० ।।

तैलं द्रुताज्यं शुचिवह्नितापात् प्लावेन सर्पिः कठिनं तथान्ये-

पयोर्विकारादधिसारमुख्याद्दुष्टांशमात्रोद्धरणेन शुद्धाः ।। ४१ ।।

वृद्धशातातपः - तापनं घृततैलानां प्लावनं गोरसस्य च।
तन्मात्रमुद्धृतं शुद्ध्येत् कठिनं च पयोदधि ॥
अविलीनं तथा सर्पिर्विलीनं प्रपणेन च ॥ ४१ ॥
क्षौद्रोदकक्षीरविकारजातं पात्रस्य दोषे शुचितान्यपात्रे ।
सर्वं द्रवद्रव्यमुशन्ति हेयमत्यन्नदोषे सति देवलाद्याः ॥ ४२ ॥
भाण्डदोषे बौधायनः -
"मधूदके पयस्तद्वद् विकाराः पात्रात् पात्रान्तरानयने शुद्धाः"॥
अत्यन्तोपघाते देवलः - सर्वद्रवाणां पक्वानां लवणानां गुडस्य च।
नान्यत्रोक्तं परित्यागादशुद्धानामिति स्थितिः ॥ ४२ ॥
फलोद्भवास्नेहघृताममांसक्षौद्राणि चेदन्त्यजभाण्डगानि ।
तदैव दुष्टान्यथ तानि तन्निष्क्रान्तानि शुद्धानि मतानि सद्भिः ॥४३॥
दुग्धादि शूद्रात् स्वगृहप्रविष्टं स्वपात्रनिक्षिप्तमुपैति शुद्धिम् ।
शूद्रादिवर्णाय सदादिहस्तात् प्राप्तं घृतेन त्वभिधारितं च ॥ ४४ ॥
द्वैस्तन्यमप्याजकमाश्वमुक्तमारण्यकं यद्यपि माहिषं च ।
भक्ष्यं पयोमुख्यमिदं द्वयं तु व्रतेऽप्यभक्ष्यं हरयेऽप्यदेयम् ॥ ४५ ॥
ग्राह्यं घृतं माहिषमाजमेवं तैलादिहोमेषु च नाविकं तु ।
हुतावशिष्टं यदि कपिलं स्यात् पयोऽपि पेयं परमग्रजातेः ॥ ४६ ॥
गौः सूतितोऽजा महिषी च शुद्धागतैर्दशाहैरथ दुग्धमांसाम् ।
असम्भवे पेयमिति प्रणीतं पेयं तु मासोत्तरतोऽन्यथैव ॥ ४७ ॥
यमः - आममांसं घृतं क्षौद्रं स्नेहादिफलसम्भवम् ।
म्लेच्छभाण्डस्थिता दुष्टा निष्क्रान्ताः शुचयः स्मृताः ॥
घृतं सर्वगोरसोपलक्षणम् ।
'शुष्कान्नं गोरसं क्षौद्रं शूद्रस्थमपि भुज्यत' इति पराशरोक्तेः' ।
शंखः - अव्यवहार्य्याणां घृतेनाभिधारितानां पुनः प्लावनमेव स्नेहानां स्नेहवद् रसानाम् ।

तत्र विज्ञानेश्वराः - ‘ मधुघृतादेर्वर्णापसदहस्तात् प्राप्तस्य पात्रान्तरानयनं प्लवनं च कार्यमिति’ ।

शंखः - सर्वासां द्विस्तनीनां क्षीरमभोज्यमनावर्ज्यम् ।

मनुः(५/८-९)-अनिर्दशायाः गोः क्षीरमौष्ट्रमेकशफं तथा ।
आविकं सन्धिनीक्षीरं विवत्सायाश्च गोः पयः ॥
आरण्यानां च सर्वेषां मृगाणां माहिषं विना ।
स्त्रीक्षीरं चैव वर्ज्याणि सर्वशुक्तानि चैव हि ॥

सन्धिनी वृषभक्रान्ता गौः सन्धिनीमुच्यते । आजं माहिषमप्युभयं भक्ष्यमपि नियमकाले न भोज्यं विष्णवेऽपि न निवेदनीयम् ।

‘पयोऽनुद्धृतसारे च गव्ये च दधिसर्पिषोः’ इति गव्यस्यैव हविष्यत्वात् ।

वाराहे भगवद्वाक्यम् -
मेध्यं ममोपयोग्यं हि गव्यं दधि घृतं पयः ।
माहिषं ह्याविकं च्छागममेध्यमित्युदाहृतम् ॥

बौधायनः - आज्यहोमेषु सर्वत्र गव्यमेव घृतं स्मृतम् ।
तदभावे माहिष्यस्तदाजमाविकमेव वा ॥
तदभावेऽपि तैलं स्यात्तदभावेऽपि जर्त्तिलं ।
तदभावेऽपि कौस्तुभं वैत्रसार्षपमित्यपि ॥

अत्र यद्यपि आविकमपि ग्राह्यं तथा प्राणनिबद्धकृतोऽपि ।

भविष्यपुराणे - कपिलायाः पिवेच्छूद्रो नरके स विपच्यते ।
हुतशेषं पिवेद् विप्रो विप्रः स्यादन्यथा पशुः ॥

यमः - अजा गावो महिष्यश्चेत्यादि ।

मनुः (५-८) - ‘अनिर्दशायाः गोक्षीर’ मिति । अत्रगोपदमजामहिष्योरुपलक्षणम् । गोमहिष्याजादीनामिति वसिष्ठस्मृतेः । इदं सर्वमसम्भवे तु मनुः -

‘गव्यं च पेयूषं प्रयत्नेन विवर्जयेत्’ । (५-६)

तथा ‘मासेन पेयूषं भवती’ ति हारीतोक्तेः सावनमासोत्तरं नवप्रसूतिकायाः गोः क्षीरं पेयमिति निष्कर्षः । इति कारिकापञ्चकस्य ॥ ४३-४७ ॥

पात्रादधोगाम्बु घृतस्य धारा तदप्यमेध्ये मिलितापि मेध्ये ।
पीतावशिष्टादपि नीरमुख्या क्षिप्त्वा क्षितौ किञ्चित्ततोऽपि पेयम्॥४८॥

स्मृतिः - मक्षिका सततिधरिति ।

तत्रार्थः । सतति सतन्यमानं तृणादि । धारा जलक्षीरघृतादेः । पात्रादधः पतन्तीति लब्धमधो स्पृष्टापि पीतं नीरं वा न दुषयन्ति इति ।

यमः - शुचिरग्नी रजो वायुरापो दधि घृतं पयः ।
सर्वाण्येतानि शुद्धानि स्पर्शशुद्धानि नित्यशः ॥

शिष्टाः - पीतशेषं तु यत्तोयं स्वल्पमेतत् क्षितौ क्षिपेत् ।
पीतशेषं न दुष्येत ब्राह्मणः पिवते पुनः ॥

इदं द्रवमात्रोपलक्षणम् । अथाह भट्टः - द्रवद्रव्याणां पानादावुपयोक्ष्यमाणानां क्षारणं संस्कारं कुर्वन्तीति । इति द्रवद्रव्यशुद्धिः ॥ ४८ ॥

अथ वस्त्रादिशुद्धिः

कौशेयमौर्णं कुतपे सपट्टे
क्षौमं च शाणं च तथा दुकूलम् ।
अल्पोपघाते सति बुद्धिमन्तः
प्रोक्तानि संशोषणसेचनाद्यैः ॥ ४९ ॥

मलीमसानां भसिताम्बुनाथाम्बुक्षालनात् पूर्वधृतेषु शुद्धिः ।
अमेध्यलेप्ये सति पट्टमुख्यं वक्तव्यकल्कादिभिरेति शुद्धिम् ॥ ५० ॥
विष्ठादियोगे शुचितामृदम्भः संक्षालनेनाथ यदांशुकस्य ।
विष्ठादिरागो प्रसरेन्न तेन छित्त्वा त्यजेद दूषितमस्य भागम् ॥५१॥
वस्त्रं स्वधौतं सकलक्रियार्हं पार्यं तु धौतं रजकेन किन्तु ।
तत्कर्म द्वैगुण्यं विधाय चोक्तं तदन्नलिप्तं न तु जातु धार्यम् ॥ ५२ ॥
अजानीते पूर्वधृतेऽपि शुद्धिः प्रावारवस्त्रे निखिलाक्रियासु ।
सुगर्वनिर्माल्ययुतांशुकानां क्षीराम्भसंक्षालनमाहुराय्यीः ॥ ५३ ॥

या तूलिकाल्पोताहृतामपे सा संशोषिता हस्तविमर्दिता च ।
सिक्ताम्भसा शुद्धमिति मता सा तथोपधानं शुचि संपणीयम् ॥ ५४ ॥
हरिद्रया पुष्परसैश्च रक्ते वस्त्रे तु शुद्धिः खलु तुलिकावरा ।
अत्यन्तदुष्टा यदि तुलिकादि यथार्हमेतत् परिशोधनीयम् ॥ ५५ ॥
मञ्जिष्ठरक्ताद्युपरक्तवस्त्रं प्रक्षालनेनैव विशुद्धमेति ।
न यद्विगानं नववस्त्रमण्डस्पर्शे तदाचारादित्यभिज्ञाः ॥ ५६ ॥
कौशेयमुक्तं कृमिकोषजातं पट्टाद्यथो कम्बलमुख्यमौर्णम् ।
य कम्बलः शैलविशेषमेष रोमाभिजातः कुतपः स उक्तः ॥ ५७ ॥
स्यादंशुपट्टं द्रुमवल्कलीयं क्षौरं क्षुमाजंत्वतसी क्षुमाख्या ।
शाणं प्रतीतं शणसूत्रजातं कार्पाससौत्रं तु दुकूलमुख्यः ॥ ५८ ॥
दोषोऽधिकोशोषरमृत्तिकेन गोमूत्रनीरान्यतरेण शुद्धिः ।
कौशेयमौर्णं च तथा विशुद्धमाद्यं तु सिद्धार्थककल्कतोऽद ॥ ५९ ॥
सारिष्टद्वारा कुतपस्य शुद्धिः सर्वल्यद्वाराशुचितांशुपट्टे ।
क्षौमे ससिद्धार्थजलेन शुद्धिस्तेनैव शाणे समयोनिभावात् ॥ ६० ॥
सहस्त्ररोमादिककम्बलस्य शुद्धिश्च यानासनवाससोः स्यात् ।
पूर्वोपभोगेऽपि शशी न वातैः शय्यांशुकानां शयने परं तैः ॥ ६१ ॥
वासोऽन्यदीयं यदि शुच्यपीनं धार्यं त्वशक्त्यावपि धौतमेव ।
पट्टादिकानामपि मृज्जलाभ्यां कल्काद्यभावे शुचितेति सन्तः ॥६२॥

अल्पोपघाते देवलः - और्णकौशेयकुतपपट्टक्षौमदुकूलकाः ।
अल्पशौचा भवन्त्येते शोषणप्रोक्षणादिभिः ॥

पट्टपदेनात्र सुपट्टम् । 'सश्रीफलैरंशुपट्टमि' ति वक्ष्यमाणयाज्ञवल्क्योक्तेः । कौशेयपदेन पट्टप्राप्तेः पट्टपदस्य द्वैरुत्त्यापत्तेश्च । क्षौमपदंमाशस्याप्युपलक्षणम् । तयोः समयोनित्वात् । पुनः सोऽपि -

'अत्यन्तं मलिनं पूर्वमद्भिः क्षारैः विशोधयेत् ।'

बृहस्पतिः - वस्त्रवैदलचर्मादेः शुद्धिः प्रक्षालनं स्मृतम् ।
अतिदुष्टस्य तन्मात्रं त्यज्येच्छित्त्वा तु शोधयेत् ॥

ब्राह्मे - 'प्रत्यहं क्षालयेद्वासो दैवे पित्र्ये च कर्मणि'

इति पूर्वधृते केवलाम्बुक्षालनेन शुद्धिः । प्रत्यहमिति पूर्वधृतविषयम् । अन्यस्य एकस्य नववस्त्रस्य बहुवारं परिधाने क्षालनं विनापि शुद्धत्वापत्तेः । न चेष्टापत्तिः । न प्रक्षालितं पूर्वधृतं वासो बिभृयादिति शास्त्रान्तरे तन्निषेधात् ।

देवलः - तान्येवामेध्यलिप्तानि क्षालयेत् शोधकैः स्वकैः ।
धान्यकल्कैस्तु कलजैः रसैः क्षारानुगैरपि ॥

तानि और्णादीनि । विष्णुः - 'अत्यन्तोपहतं सत्प्रणिसेधः, वाक्यभेदापत्तेः । नापि पुरुषार्थवस्तुधारणे निषेधः । वाक्यभेदेन । 'कारुहस्तः सदा शुची' (या.स्मृ. १-१८७) ति दोषाभावाच्च । केवलं रजकधौतपरिधाने कर्मवैगुण्यम् । पुत्रादि धौत इव स्वधौताभावान्नाधर्मः । रजकधौतार्द्रगर्दभारुढवस्त्रपरिधानं दुराचारमध्ये गणितं तद्गर्दभस्पर्शदोषमभिप्रेतगर्दभस्यास्पृश्यत्वात् । न चास्पृश्यस्पर्शने पुरुषस्यैव दोषो न वस्त्रस्येति वाच्यम् । चाण्डालादिस्पृष्टवस्त्रस्य पुरुषवदेव दुष्टत्वोक्तेः । तदुक्तं भट्टैः-

पुरुषस्य सचेलस्य स्नानं यस्माद् विधीयते ।
तस्मात् पुरुषवद् वस्त्रं न गवाश्वादिवन्मतम् ॥ इति ।

केवलं मूत्रपुरीषादिलेपनान्नयेत् प्रागुच्छिष्टलेपनवस्त्रस्य लेपात् प्रक्षाल्याचम्य प्रयतो भवतीति आपस्तम्बवचनादनुपदस्य मूत्रपुरीषपदसाहचर्येणाभोज्यान्नपरत्वाद्रजकान्नलिप्तं धौतं न ग्राह्यम् । पूर्वपरिगृहीतं वासः प्रक्षाल्यैव बिभृयादिति वचनान्तरे परिगृहीतपदादधोवस्त्रपरमेव क्षालनम् । एतत्समानार्थत्वात् पूर्वधृतमित्यपि अधोवस्त्रपरम् । तेनोत्तरीयस्य न प्रत्यहं क्षालनमिति । शिष्टाः 'तद्वन्निर्माल्यसंस्पृष्टवस्त्राणां क्षारवारिणा ।

देवलः - तुलिकामुपधानं च पुष्परक्ताम्बरन्तथा ।
शोषयित्वातपे किञ्चित्करैः संमार्जयेत् मुहुः ॥
पश्चाच्च वारिणा प्रोक्ष्य नियुञ्जीत स्वकर्मणि ।
तान्यप्यतिमलिष्ठानि यथावत्परिशोधयेत् ॥

पुष्परक्तमिति हरिद्रारक्तस्योपलक्षणम् । रागद्रव्याणि प्रोक्षितानि शुचिनीति शङ्खवचनात् । एतच्च रागलोपभयात् । अत एव मञ्जिष्ठरागादौ क्षालनमेवेति विज्ञानेश्वराः । कार्पासतन्तुकृतं वस्त्रदुकूलादंशुकैरुच्यते । शणसूत्रकृतं शोणम् । कौशेयं कृमिकोषोत्थम् । तसरो पट्टादिः । क्षुमा अतसी तद्युक्तं क्षौममेतद्देशान्तरीयमिति विज्ञाः । ऊर्णा मेषादिलोम्नि स्यादिति विश्वः । और्णं अवीलोमकृतं कम्बलादिः । अंशुपट्टं भल्कलतन्तुकृतम् । कुतपः पार्वतीयछागरोमनिर्मितः कम्बलः ।

याज्ञवल्क्यः(१-१८६) -

सोषरोदकगोमूत्रैः शुद्धत्याविककौशिकम् ।
सश्रीफलैरंशुपट्टैः सारिष्टैः कुतपं तथा ॥

ऊषरमृत्तिकासहितेन गोमूत्रेणोदकेन इत्यर्थः । बहुवचनं पश्चादप्राप्त्युदके प्राप्त्यर्थम् । सश्रीफलैः बिल्वफलसहितैरित्यर्थः ।

उशनाः कौशेयस्य शुद्ध्यन्तरमाह - 'कौशेयस्य गौरसर्षपकल्केनेति' ।

याज्ञवल्क्यः(१-१८७) - सगौरसर्षपैः क्षोम शुद्ध्यतीत्यनुवर्त्तते । गौरः श्वेतः । क्षोमवदेव शाणस्य समयोनित्वात् इति विज्ञानेश्वरादयः ।

प्राचीनाः - शुद्धान्तस्य पुनर्विशेषणेऽस्पृश्यत्ववचनाभावान्न वाचनिकमस्पृश्यत्वम् । किन्तु समाचारप्रमाणकमेव । समाचारस्यामेध्यस्पर्शनस्यैव प्रमाणम् । तत्र हि व्यतिरिक्त शुद्धाद्यन्तस्पर्शानि सैव साधूनां विगानं वस्त्रमण्डेष्वविगानमिति निबन्धकाराः ।

अङ्गिराः - शौचं सहस्ररोमाणां वाय्वग्न्यर्केन्दुरश्मिभिः ।
रेतः स्पृष्टं शवस्पृष्टमाविकं चैव दुष्यति ।
शयनासनयानानि रोमशानि तु यानि तु ।
व्रताण्येतानि सर्वाणि संहितानि प्रचक्षते ॥

रोमशानि कम्बलादीनि । संहितानि शयनासनयानानि वाय्वादिभिः शुद्ध्यतीत्यवगम्यतेऽन्यथा पूर्वोक्तशुद्धीनां वैयर्थ्यं स्यात् । तथा शय्यादि

वस्त्रस्यार्ककिरणादिभिः शुद्धिः स्वाप एव नान्यत्रेति। मृत्तिकाशतधौतेन रात्रि वासो न शुद्ध्यति इति वचनान्तरात्।

महाभारतेपि- अन्यदेव भवेद्वस्त्रं शयनीये सदैव हि।
अन्यदश्यास्तु देवानामर्चायामन्यदेव हि॥

शयनकालीनवस्त्रयथेष्टाचारवस्त्रयोः कर्मणि निषेधाच्च। परकीयवस्त्रपरिधानविषये

गौतमः - निर्णेज्यादशक्ताविति।

ब्राह्मे - 'सर्वं विण्मूत्रं शुक्रैश्च दूषितं च मृदाम्बुभिः'

इत्युक्तत्वात् कल्काद्यसम्भवे मृज्जलाभ्यामपि पट्टादीनां शुद्धिः इति चतुर्दशकारिकासु॥ ४९-६२॥

रसोऽपि नित्या यदि कम्बलः स्यात्स्पृश्योऽथ नीलावृतपट्टवस्त्रम्।
स्पृश्यं त्वधार्यं ह्यथभोगलालादिकेवलानां कलनीयमुक्तम्॥ ६३॥
नारीधृतं चेदपि नीलवस्त्रं स्पृश्यं द्विजस्याप्यथ भूमिपैस्तत्।
वैश्यैश्च वृद्धैः यदि तं हि धार्यं धार्यं न ताभ्यामपि तत्प्रसिद्धम्॥६४॥

नरसिंहपुराणे - न रक्तमुल्वणं वासो न नीलं च प्रशस्यते।

उल्वणमधो नाभ्या उपरि जान्वाछादयितेत्येतत्प्रमाणाधिकम्। तथा सर्वविरागात् वासांसि वर्जयेत् कृष्णं च स्वाभाविकम्।

तथा - नीलरक्तं यदा वस्त्रं ब्राह्मणोऽङ्गेषु धारयेत्।
अहोरात्रोषितो भूत्वा पञ्चगव्येन शुद्ध्यति। इति॥

शङ्खः - नीलरक्तं परिधाय भुक्त्वा स्नानार्हकस्तथा।
त्रिरात्रं तु व्रतं कुर्यात् छित्वा गुल्मलतास्तथा॥

तत्र 'कम्बले पट्टवस्त्रे च नीलरागो न दुष्यति' इति वचनात् स्पर्शे न दोषः।

तथा - स्त्रीणां सम्भोगकाले च शयनीये तथैव च।
स्त्रीधृता शयने नीले ब्राह्मणस्य न दुष्यति।
नृपस्य वृद्धौ वैश्यस्य पूर्वं वर्णं न दुष्यति।

इति कारिकयोः॥ ६३-६४॥

दोषेऽधिकेऽल्पेऽशुकवद्धशुद्धं चर्माथ कृष्णाजिनं मूलवालैः ।
वस्त्रोदितैर्वाञ्छितमन्यकर्म नियुक्तमन्येष्वपि योज्यमेव ॥ ६५ ॥
वद्ध्रवादिके चर्मविकारभूते सद्भिर्मता प्राकृतचर्मशुद्धिः ।
सर्वत्र बोध्यं विकृतावपीत्थं सचामरस्य शुचि मृदूजलाभ्याम् ॥६६॥

मनुः (५-११९)- चेलवच्चर्मणां शुद्धिः ।

यमः - कृष्णानां बालैर्वलिनां मृदभिरम्भसा ।

गृह्यपरिशिष्टे - दर्भाः कृष्णाजिनं मन्त्रा ब्राह्मणा हविरग्नयः ।
अथायातनान्येतानि नियोज्यानि पुनः पुनः ॥

चर्मग्रहणं तद्विकाराणां वस्त्राजिनमुपलक्षणमिति विज्ञानेश्वरः । एवं सर्वत्रापि विकृतिषु प्रकृतिशुद्धिरेवेति तदुपरिष्टादधोऽपि बोध्यम् । इति कारिकयोः । इति वस्त्रादिशुद्धिः ॥ ६५-६६ ॥

अथ तैजसपात्रादिशुद्धिः

सुवर्णदुर्वर्णककांस्यताम्राम्भस शरङ्गाणि सपित्तलानि ।
स्युः शङ्खमुक्तादि शिला च रत्नं निर्लेपनान्येव शुचीनि तोयैः ॥ ६७ ॥
कांस्यं सलेपं भणितेन शुद्धं लौहं तु केनाप्युत गोमयेन ।
ताम्रं तथाप्यम्लरङ्गसिसानि अश्मानि रीतिस्त्वथवा मृदैव ॥ ६८ ॥
अम्लेन रूप्यं शुचिहाटकं च गोधूममाषादिकचूर्णकैकं ।
मार्ष्टयर्कया तोययुजैव शुद्धिलोपानपायेतिसृभिः मृद्भिः ॥ ६९ ॥
द्विजेषु शूद्रादनपात्रयोगे स्यादेकविंशावधिमार्ष्टयः स्याः ।
भस्मोदकाख्यामथवाप्यमीषु शुद्धिर्मता स्याद्यः समार्जनाभिः ॥ ७० ॥
द्विजातयस्तेष्वपि भाजनेषु परस्य चेद्भोजनमाचरन्ति ।
तथैव मार्ष्टयर्थं शुचित्वमुक्तं स्वपात्रशुद्धिरिव शङ्खवाक्ये ॥ ७१ ॥
शुद्धोपभुक्तं चतुरर्मृदाभि विशोध्य कांस्यं परिताप्य वह्नौ ।
प्रमार्ज्य हस्तेन धृतं विशुद्धं गोशृङ्गसंस्पर्शनतो द्विजस्य ॥ ७२ ॥

कांस्यं च काकोपहतं गवा च घ्रातं विशुद्ध्यथमार्जनाभिः ।
पात्राणि मार्जारीमुखोपघाते यातेऽपि दोषावहतां न यान्ति ॥ ७३ ॥
गण्डूषप्रक्षालनयोः कृतिश्चेत्कांस्ये तु ख्यातं भुवि मासषट्काम् ।
यथा सहेतऽवलने तथा तत्कांस्यं पुनस्तप्तमुपैति शुद्धिम् ॥ ७४ ॥
काकादि कृष्णाद्विजतुण्डलग्नान्युल्लेखयेत्तैजसभाजनानि ।
शुद्ध्यन्त्यर्थ श्वपदवक्रलग्नान्येतानि शुद्धानि तु जातु यानि ॥ ७५ ॥
विण्मूत्रशुक्रादिभिरल्पदुष्टं तत्तैजसं भाजनमग्नितप्तम् ।
गोमूत्रवासेन महानदी वार्यवस्थितेर्वा शुचि सप्तरात्रम् ॥ ७६ ॥
अत्यन्तदुष्टं यदि तैजसं स्यात्त्याज्यं पुनः संघटनं हि वास्य ।
अत्यन्तदौष्टं शवरादि मद्यविण्मूत्रशुक्रादिमलान्तयोगे ॥ ७७ ॥
श्वमृर्त्तिका पुष्पवनीनिषाद संस्पर्शमुक्त्योः शुचताग्निदाहात् ।
त्रिसप्तकृत्वः परिभाजनानि सर्वत्रदाहे नियतानि पूर्वम् ॥ ७८ ॥
दाहेन ताम्रे शुचितामिषाक्तेऽथ गौरसैराज्यमृतेयुतेऽस्मिन् ।
क्षौद्राक्तताम्रेऽपि मदाक्तथादि स्यान्नारिकेलाम्बुयुतेऽपि कांस्ये ॥ ७९॥
मणौ तथा मौक्तिकशङ्खमुक्तादौ लेपयुक्ते सिकताम्बुघृष्टा ।
यद्वाम्बु भस्मोन्मृजयाथ द्रौष्टे सप्ताहभूमिनिखनेन शुद्धिः ॥ ८० ॥
अश्माप्यलिप्तं शुचिरम्भसाथ क्षाराम्बुना वा सिकतामृद्घृष्टा ।
लिप्योऽथ दुष्टौ निखनेन सप्ताहं वाथवा तक्षणतोऽस्य दाहात् ॥ ८१॥
अलिप्तमृद्भिः शुचिदारुलिप्तं मृदम्भसा तक्षणतोऽतिदुष्टम् ।
जलेन शुद्धिर्विदलस्य वंश्यादिकस्य दोषे जलगोमयाभ्याम् ॥ ८२ ॥
संस्पृश्यकासारमतंगजादिशृङ्गास्थि दन्ता यदि चाल्पदुष्टाः ।
गोमूत्रकेणाथ जलेन शुद्धा अत्यन्तदुष्टा यदि तक्षणेन ॥ ८३ ॥
स्यान्नारिकेलीयफलादिपात्रं गोबालरज्वाम्बुविघर्षणेन ।
दोषऽधिके शुद्धमथाल्पकेऽम्बु मृदम्भसि सर्वविशोधिके यत् ॥ ८४ ॥
मृद्भाजनं मूत्रविडादिमद्यैर्विष्ठाद्यन्यैः शोणितशुक्रपूयैः ।
स्पृष्टं परित्याज्यमथाल्पदोषे पुनर्विपाकात् शुचितां प्रयाति ॥ ८५ ॥

त्यागोऽतिदोषे फलदारुजेषु पात्रेषु वा वैदलमृण्मयेषु ।
यत्संहतानामपि भाजनानां दुष्टं परित्याज्यमिदं न चान्यत् ॥ ८६ ॥
भस्मोल्मुकादौ शुचितेति कांस्यं ताम्रादिकानां नियमो न कार्यः ।
भस्मादिकाद्यन्यतमेन वा मृज्जलेन वात उदलाभ एव ॥ ८७ ॥

ब्राह्मे - सुवर्णरुप्यशृंगाश्च शुक्तिरत्नमयानि च ।
कांस्यायस्ताम्ररैत्यानि त्रपुसीसमयानि च ॥
निर्लेपानि च शुद्ध्येत केवलेनोदकेन तु ॥

मनुः(५-११२)- निर्लेपं काञ्चनं भाण्डमद्भिरेव विशुद्ध्यति ।
अब्जमश्ममयं चैव राजतं चानुपस्कृतम् ॥

रीति : पित्तलं तत्पुनरैत्यानि । अब्जं शंख-शुक्ति-मुक्ताफलादि ।
अनुपस्कृतं अत्यन्तानुपहतम् । अलेपानां शुद्धिमाह शंखः -
अम्लोदकेन ताम्रस्य सीसस्य त्रपुणस्तथा ।
क्षारेण शुद्धिः कांस्यस्य लौहस्य गोमयस्य च ॥

देवलः - लौहानां दहनात् शुद्धिर्भस्मना गोमयेन वा ।

याज्ञवल्क्यः - त्रपुसीसकताम्राणां क्षाराम्लोदकवारिभिः ।
भस्माद्भिः कांस्यलौहानां शुद्धिः प्लावो द्रवस्य तु ॥(१-१९०)

काञ्चनरजतादित्यनुवृत्तौ हारीतः -
स्नेहवैगुण्योपहतानां यवगोधूमकलायमाषचूर्णमार्जनाभिः क्षालनम् ।'

मनुः - तैजसानां मणीनां च सर्वस्याश्ममयस्य च ।
भस्मनाऽद्भिर्मृदा चैव शुद्धिरुक्ता मनीषिभिः ॥ (५-१११)

तथा च - सलेपतैजसपात्राणां भस्माम्बुना मृदाम्बुना वा ।

शुद्धिरिति विकल्पे पित्तलस्य मृज्जलाभ्यां शुद्धिसमाचारः सन्मूलः । त्रपुसीसकेत्यादि याज्ञवल्कीयवचनेन शंखसीसकपात्राणां क्षारोदकाम्लोदकयोः विकल्पेऽपि भस्माम्बुना शुद्धिरसम्भवविषयम् । अम्लोदकेनैव ताम्रशुद्धिरिति समाचारदर्शनात् । उच्छिष्टोपहतानां शूद्रोच्छिष्टापात्रोपहतानामित्यर्थः । अन्यत्र ब्रह्मक्षत्रेत्यादिना शंखवचनबाधापत्तिः ।

मनुरपि - गवाघ्रातानि कांस्यानि श्वकाकोपहतानि च।
शुद्ध्यन्ति दशभिः क्षारैः शूद्रोच्छिष्टानि यानि च॥

तथा शूद्रोच्छिष्टस्पृष्टपात्राणां तैजसानां कांस्यादीनां यथायोग्यमेव विंशतिवारसितभस्मादिमार्जनैः शुद्धिः। शूद्रोच्छिष्टानीत्यत्र शूद्रोच्छिष्टपात्रस्पृष्टानीति निबन्धकारः। मनूक्तदशवारमार्जनं त्वसम्भवविषयम्।

शङ्खः - ब्रह्मक्षत्रविशां चैव सकृत् संमार्जनात् शुचिः।
चतुर्थेन तु यद्भुक्तं चतुर्भिरथमार्जनैः॥
अग्नौ निक्षिप्य गृह्णीयात् ताप्येत् प्रक्षालयेत्ततः।
गोशृंगेन तु तत्पात्रं संस्पृष्टं शुचितामियात्॥

ब्राह्मणक्षत्रियवैश्यैर्यस्मिन् भाजने भोजनं कृतं तत् सकृत् संमार्जनेन शुद्धिरित्यर्थः। इदं च परकीयपात्रविषयम्। स्वपात्रशुद्धेरुक्तत्वात्। चतुर्थेन तु शूद्रेण ब्राह्मणादीनां पात्रे भुज्यते चेत्तर्हि चतुर्मार्जनादिगोशृंगस्पर्शनात् शुद्धिः।

अत्र ब्राह्मणादिभोजनं पात्रस्यापि सकृत् सम्मार्जनोक्तरन्यप्रकारलेपे सकृत् सम्मार्जनं कैमुतिकन्यायात् सिद्धम्।

मनुः - गवाघ्रातानि कांस्यानि श्वकाकोपहतानि च।
शुद्ध्यन्ति दशभिः क्षारैः शूद्रोच्छिष्टानि यानि च॥
'मार्जारीश्चैव दर्वी च मारुतश्च सदा शुचिः।'

इति मनुवचनाच्च मार्जारीमुखावमृष्टानां पात्राणामशुद्धिभावः।

अङ्गिराः - गण्डुषं पादशौचं च यः कुर्यात् कांस्यभाजने।
भूमौ निक्षिप्य षण्मासान् पुनराकरमादिशेत्॥

इति विभक्तिव्यत्ययेन सप्तम्यर्थे प्रथमेति। आकरमादिशेत् अग्नौ दहेत्। इत्यर्थः।

काकादिमुखोपघाते तु -
कृष्णशकुनिमुखावमृष्टं निलिखेत् पात्रम्।
श्वापदमुखावमृष्टं न प्रयुञ्जीत पात्रम्॥

बौधायनः - मूत्रपुरीषरेतः प्रभृत्युपहतानां पुनः पाकः गोमूत्रे वा सप्तरात्रं वा महानद्यां वा। इदं च मूत्रादीनां किञ्चित् संस्पर्शे। चिरकालं संस्पर्शे तु शंखः -

तैजसानां कुणपमुत्रपुरीषोपहतानामावर्त्तनमुल्लेखनेन । अथवा त्रिः सप्तकृत्वः परिमार्जनं इति बौधायनः । तैजसानामत्यन्तोपहतानां त्यागः । आवर्त्तनं पुनर्धटनमिति निबन्धकृतः । तथा चासम्भवे त्याग एव युक्तः । सम्भवे तु पुनर्घटनमित्यभिप्रायः । अत्र वा शब्दः व्यवस्थायाम् । तथा च अल्पोपघाते उल्लेखनं एकविंशतिघर्षैः । शैलानां शैलवद्घर्षणमार्जनैर्मणिमयानामिति विष्णुः । 'अब्जमयमश्ममयं मणिमयं च सप्तरात्रं महीनिखनेन' इति ।

देवलः - दहनात् खननाद् वापि शैलानामम्भसाऽपि वा ।
काष्ठानां तक्षणात् शुद्धिर्मृद्गोमयजलैरपि ॥

अत्र दहनखननतक्षणाद्यत्यन्तोपघाते । अन्यानि जले च हारीतः - मृत्लेपनैर्दारुमयानां तथा च काष्ठभाजनादिकमत्यन्तोपहतं तक्षणात् सलेपं मृज्जलाभ्यां गोमयजलाभ्यां वा अन्यथा जलेनैवेति व्यवस्थिता । अद्भिस्तु प्रोक्षणमित्यनुवृत्तौ

मनुः - 'वैदिकानां तथैव च' ।

हारीतः - गोमयलेपनैर्देवलमिति ।

मनुः - क्षौमवच्छंखशृंगाणामस्थिदन्तमयस्य च ।
शुद्धिर्विजानता कार्य्या गोमूत्रेणोदकेन वा ॥ (५-१२१)

विष्णुः - 'दन्तशृंगास्थिमयं तक्षणेन' । (२३-४)

याज्ञवल्क्यः (१-१८५) - 'तक्षणं दारुशृंगास्थ्ननागोबालैः फलसम्भवाम्' स्पृश्यानां महिषीहस्तीवराहादिसम्बन्धिनां शृंगास्थिदन्तानामिति निबन्धकृतः ।

हारीतः - 'गोबालरज्ज्वा सोदक्या फलपत्राणाम्'

अन्यदोषे तु मृज्जलाभ्यां शुद्धिः क्रियते । 'मृत्तोयैः शोध्यते शोध्यान्' इति मनुना तयोः सामान्येन शोधकस्योक्तत्वात् । मनु (५-१२२) : 'पुनः पाकान्महीमयम्' । 'सदेयोर्मूत्रपुरीषैर्वा ष्ठीवनैः पूयशोणितैः । 'एकविंशतिवारमार्जनम् । ' महोपघाते पुनर्घटनमि' ति ।

विष्णुः - 'शरीरैर्नैर्मलैर्मद्यैः सुराभिर्वा यदुपहतं तदत्यन्तोपहतं सर्वलौहमयभाण्डमग्नौ प्रतप्तं शुद्ध्येत्' । सर्वलौहमयं सुवर्णाद्यष्टधातुमयं प्रतप्तमित्येकेन पुनर्घटनं विवक्षितं शंखवचनानुसारात् ।

सूतिकाशवविण्मूत्ररजस्वलोपहतानि च।

प्रक्षेप्तव्यानि तान्यग्नौ यत्स यावत् सहेदपि ॥

हारीतः - श्वचाण्डालोदक्यादि स्पर्शमार्जनयोरपि सप्तकृत्वः परिमार्जनम्। त्रिसप्तकृत्वः एकविशंतिवारमित्यर्थः। तथा च एकविंशतिवारमार्जनानन्तरं दाहः कार्य्यः।

पराशरः - ताम्रमम्लेन शुद्ध्येत ह्यामिषैः यन्न लिप्यते।

आमिषैर्लिप्तपात्रं तु पुनर्दाहेन शुद्ध्यति ॥

शिष्टाः - नारिकेलोदकं कांस्ये मधु ताम्रे च संस्थितम्।

गोरसं ताम्रपात्रस्थं मध्यतुल्यं घृतं विना ॥

इति वचनात् ताम्रस्य घृतव्यतिरिक्तसकलगोरसयोगे क्षौद्रयोगे च कांस्यपात्रस्य नारिकेल तदुदकयोगे मद्ययोगे शुद्धिः पूर्ववत्। सलेपमश्मादीनां शुद्धिमाह -

मनुः - तैजसानां मणीनां च सर्वस्याश्ममयस्य च।

भस्मनाऽपि मृदा चैव शुद्धिरुक्ता मनीषिभिः ॥ (५-१११)

काश्यपः - सिकताभिर्दन्तशंखमुक्तानामिति।

हारीतः - सिकताभिः संस्पृष्टैनैव शुद्ध्यते। 'पुनः पाकान्महीमयम्'। तत्र परिष्कृत्य इत्यर्थः।

शंखोऽपि - 'दारवं मृण्मयं च जुहुयात्।

शिष्टाः - विष्ठाद्युपहतं त्याज्यं पालं स्याद्वेणुमृण्मयम्।'

वेणुपदं वेत्रादि वैदलोपलक्षणम्।

वृद्धशातातपः - संहतानां तु पात्राणां यद्येकमुपहन्यते।

तस्य तच्छोधनं प्रोक्तं न तु तत्स्पृष्टिनामपि ॥

अत्र सर्वत्र भस्मादीनां न नियमः।

मलसंयोगजं यत्तु यस्य येनोपहन्यते।

तस्य तत्साधकं प्रोक्तं सामान्यद्रव्यशुद्धिकृत्।

इति शास्त्रान्तरात्। तथा च प्राचीनोक्तभस्माद्यभावे कांस्यादीनामम्लादीनां शुद्धिः। अथवा मृज्जलाभ्यां तयोः सर्वशोधकत्वात् ॥ ६७-८७ ॥

अथ यज्ञपात्रशुद्धिः

करेण मार्ष्ट्यध्वरभाजनान्ययागेऽन्यदोषे जलसेचनेन ।
प्रोक्षण्यमन्त्रं चमसो ग्रहं स्फ्यं उलूखलानों मुषलादिसूर्पम् ॥ ८८ ॥
प्राशित्रपात्रे चरुभाजनेनापात्रे स्रुवस्रुक्ध्रुवकं परं च ।
जुहूस्तथा स्नेहयुज्यानि तप्ताम्भसाविशुद्धान्यपराण्यपि स्युः ॥ ८९ ॥
यज्ञीयपात्रेऽप्यतिदोषयोगे संप्रोक्षणाद्यैः शुचिता यथा नः ।
कीटादिपाते हविरन्नयोश्चेत् तयोर्विशुद्धौ त्विदमत्र शुद्धिः ॥ ९० ॥

अनः शकटं यज्ञांगम् । आदिपदेन दक्षदृष्टफलकृष्णाजिनशम्याभ्र्यादीनां संग्रहः ।

मनुः - मार्जनं यज्ञपात्राणां प्राणिनां यज्ञकर्मणि ।
चमसानां ग्रहाणां च शुद्धिः प्रक्षालनेन तु ॥
चरूणां सुक्स्रुवाणां च शुद्धिरुष्णेन वारिणा ।
स्फ्यशूर्प-शकटानां च मुषलोलूखलस्य च ॥ (५-११६,११७)

याज्ञवल्क्यः - 'ऊर्ध्वपात्रं ग्रहाश्मनामि' ति वा पात्राणां चमसानां च वारिणा शुद्धिरित्यते ।' इति । तत्र विज्ञानेश्वरः - ऊर्ध्वपात्रं यज्ञीयोलूखलादिपात्राणि प्रोक्षणीप्रभृतीनि च ।'

याज्ञवल्क्यः - 'चरुस्रुक्स्रुवसस्नेहपात्राण्युष्णेन वारिणा' इति । (१-१८३)

तत्र विज्ञानेश्वराः - चरु चरुस्थाली । सस्नेहानि पात्राणि प्राशित्रहरणादीनि ।

एषामपि पात्राणां दोषातिशये विशिष्योक्तेस्ततृक्षणादिभिरेव शुद्धिरिति विज्ञाः । हविरन्नयोः कीटादिपातादिदोषे तयोर्वक्ष्यमाणोष्णोदकसेचनादिना या शुद्धिस्तयैतत् पात्रयोः शुद्धिर्न तत्र पात्रोक्ता शुद्धिः । तत्र शुद्धिवत् पात्रशुद्धेः कैमुतिकन्यायसिद्धत्वात् । इति ॥ ८८-९० ॥

अथ पित्तलादिप्रतिमाशुद्धिः

रैत्यादिदेवप्रतिमाल्पदुष्टाः सहस्रतोयस्नपनैः समन्त्रैः ।
शुद्धाथ तस्य अतिदोषयोगे शिलादिशुद्धिश्च पुनः प्रतिष्ठा ॥ ९१ ॥
रजस्वलागर्दभकुक्कुरादिभिः स्पृष्टा महापातकिरोगिभिश्च ।
अशौचचण्डालजनैश्च काकमनुष्यविष्ठादियुताऽमराद्धा ॥ ९२ ॥
भूयो व्यतिक्रान्तसमर्चनाच्चान्यदेव मन्त्रेण समर्चनाच्च ।
सहस्रकुम्भस्नपनैः स्वमन्त्रैः शुद्धाथवा स्याद् यदि सम्भवः स्यात् ॥ ९३ ॥
अष्टोत्तरेणाथ शते कुम्भस्नानं निजब्राह्मणभोजनैश्च ।
शुद्धाप्यतीतैकदिनार्चना चेदेवं द्विजस्यादिषु शुद्धिरूह्या ॥ ९४ ॥
द्रव्यविशुद्धिस्त्वभिषेचनेन सर्वत्र दाहादि तु वर्जनीयम् ।
न स्यात् प्रभाशस्तविभञ्जनेऽपि दुष्टाथ शिला यदि खण्डितापि ॥ ९५ ॥

पित्तलादि देवप्रतिमाया अल्पदोषे यथायोग्यं शतादिजलकुम्भस्नानादिभिः समन्त्रैः शुद्धिः। तत्र देवानां प्रतिमा शुद्धीत्यादि ब्राह्मवचनं गृहशुद्ध्युल्लिखितमनुसन्धेयम् ।

संस्पृश्यस्पर्शाद्यत्यन्तदूषितधात्वादिनिर्मितप्रतिमायाः प्रकृतद्रव्योक्तशुद्धिं विधाय पुनः प्रतिष्ठापनेन पूजार्हत्वम् । तथा च शुद्ध्येदित्यनुवृत्तौ मनुः -

'द्रव्यवत् कृतशौचानां देवार्चानां पुनः प्रतिष्ठाने' ति ।

तथा च -

खण्डिते स्फुटिते दुष्टे भ्रष्टे मानविवर्जिते ।
यागहीने पशुस्पृष्टे पतिते दुष्टभूमिषु ॥
अन्यमन्त्रार्च्चितो चैव पतितस्पर्शदूषिते ।
दशस्वेतेषु नो चक्रुः सन्निधानं दिवौकसः ॥

यागहीने पूजारहिते पशुरस्पृश्यः । बृहद्विध्यसम्भवे स्नपनादिशक्त्यप्युक्ता प्रतिष्ठा कार्या इति निबन्धकृतः । ततः सहस्रकलशस्नानेनाविशुद्धिरहोरात्रव्यतिरिक्तान्तो पूजाया स्त्रिदशाधिपे ।

अष्टोत्तरशतैः कुम्भैः परेद्युः स्नानपूर्वकम् ।
नव ब्राह्मणभोज्यैश्च निर्दोषकारको भवेत् ।
एवं च दिनवृद्ध्या तु दोषावृत्तिर्विधीयते ॥

पूजा व्यतिक्रमो पूजनम् । अन्यमन्त्रपूजनं च दोषावृत्तिरिति दोषनिवृत्त्यर्थं प्रायश्चित्तवृद्धिर्लिख्यते । भ्रष्ट इत्यस्थले स्नानविषयम् । तत्र पुनः प्रतिष्ठार्थसिद्धिर्वा । खण्डितादित्रये मानहीने च त्यागः ।

अन्यत्र तत्र प्रभायुधादीनां भग्नता न तु हानिकृत् । अत्र मनसंघटनाङ्गत्वात् सिद्धप्रतिमाघटनाया अभावात् द्वारलोपादकम्पी स्यादिति न्यायेन मानवध्यप्राप्तौ मानवर्जितकृत्रिमपात्रपरम् ।

तत्र साहचर्यात् खण्डितादपि कृत्रिमपरमेवेति सिद्धप्रतिमासु खण्डादिना न देवसान्निध्यदोषः । तथा च तत्त्वसारसंहितायाम् -

सान्निध्यं यत्र कुत्रापि कुरुते या तु देवता ।
होमैरेतैस्तथान्यैश्च संयुक्तेऽपि न तां त्यजेत् ॥

तथा - असुरैर्मुनिभिर्देवैस्तत्त्वविद्भिः प्रतिष्ठितम् ।
जीर्णं वाप्यथवा भग्नं विधिनापि न चालयेत् ॥

सहस्रकुम्भादिष्वपि सर्वत्र प्रकृतिद्रव्यशुद्धिः कांक्षैव, किन्तु दाहादि न कार्य्यम् । इति करिकापञ्चकस्य । इति पित्तलादिप्रतिमाशुद्धिः ॥ ९१-९५ ॥

अथ भङ्गापवादः

यच्छौक्तिकस्फटिकहैमरौप्यशांखीयताम्रोद्भवपात्रजातम् ।
तदभिन्नमप्याहुरभिन्नतुल्यं पूजादिके ग्राह्यमसम्भवेऽपि ॥ ९६ ॥

ब्राह्मे - स्रस्तभाण्डानि वर्ज्याणि पितृदैवतकर्मणि ।
सुवर्णताम्ररौप्याश्मस्फटिकशंखशुक्तयोः ।
भिन्नादपि हि योज्यानि पात्राणि पितृकर्मणि ॥

पितृपदं दैवतोपलक्षणम् । इति तैजसद्रव्यादि शुद्धिः ॥ ९६ ॥

अन्नादिशुद्धिः

प्रातं गवा कुक्कुटदृष्टिदुष्टं कीटादिकैः केशनखैश्च दुष्टम्।
क्षुन्नादितः सन्निहितं मुखोद्यत् श्वासाहतं शुद्धशाकुन्तभुक्तम्॥ ९७॥
रजस्वलासुतविकर्मशस्त्रपातित्यपुङ्नास्तिकगण्डदुष्टम्।
पक्वान्नमप्याक्तपुरीषजुष्टं यद्भोजनस्यावसरे तदास्मात्॥ ९८॥
दुष्टांशमात्रं हि निरस्य शेषं भस्मोदकप्रोक्षणभक्षणीयम्।
मृत्स्वर्णरूप्यादिकधातुनीराज्यासिच्य वा व्यस्तसमस्तभावान्॥ ९९॥
विवाहयज्ञे त्रिदशोत्सवादौ द्रौणप्रमाणाधिकसिद्धमन्नम्।
श्वाघ्राणदुष्टं यदि वापि काकस्पृष्टं ततोऽशं हि निरस्य दुष्टम्॥ १००॥
गायत्रीमन्त्रेण सुवर्णनीरं सिक्त्वा परं सर्वमशंकमास्यम्।
परं श्वकाकेन च सद्यभुक्तं तदन्नजातं नहि भक्षणीयम्॥ १०१॥
पक्वान्नमश्यात् प्रयतः द्विजेन जुष्टौ तु वह्नौ परिताप्य भोज्यम्।
भुक्ते तु विप्राङ्घ्रिहते विपत्तौ युतोक्तशुद्ध्यै नहि भक्ष्यतोक्ता॥ १०२॥

मनुः - पक्षिजग्धं गवाघ्रातमवधूतमवक्षुतम्।
दूषितं केशकीटैश्च मृत्क्षेपणाद् विशुद्ध्यति॥
अन्ने भोजनकाले तु केशलोमविभूषिते।
अनन्तरं स्पृशेदापस्तच्चान्नं भस्मना स्पृशेत्॥

इति स्मृतेः। 'केशलोमनखैर्वापि दूषितं परिवर्जयेदि' ति देवलोक्तिस्तु पाककालीन तत्स्पृष्टान्नविषया।

सुमन्तुः - क्षुतिवचोभिहतं श्वभिराघ्रातं प्रेक्षितं चान्नमभोज्यमन्यत्र हिरण्योदकैः स्पृष्टात्। यस्यान्नस्य निकटे क्षुतकृतं यस्य वा निकटे वचनमुच्चारितं तत् क्षुदवचोऽभिहतं क्षुतिं छिक्का अवधूतं मुखश्वासाहतं श्वभिः प्रेक्षितमाघ्रातं च।

यमः - मक्षिकाकेशकीटादिपतितं वापि दृश्यते।
मूषिकस्य पुरीषं वा क्षुतं यच्चावधूनितम्॥
भस्मना स्पृश्यं त्वश्नीयादभ्युक्ष्य सलिलेन वा॥

शातातपः - केशकीटगवाघ्रातं वायसोपहतं च यत् ।
क्लीबाभिशस्तपतितैः सूतिकोदक्यनास्तिकैः ॥
दुष्टं वा स्याद् यदन्नं तु तस्य निष्कृतिरुच्यते ।
उद्धृत्य किञ्चिदभ्युक्ष्य भुंजीतैवाविशंकितः ॥
भस्मना चापि संस्पृष्य संस्पृशेदुदकेन वा ।
सुवर्णरजताभ्यां वा भोज्यं धातुमयेन वा ॥

मनुः - देवद्रोण्यां विवाहे च यज्ञेषु प्रकृतेषु च ॥
काकैः श्वभिश्च संस्पष्टं तदन्नं नैव दुष्यति ॥
तन्मात्रमन्नमुद्धृत्य शेषं प्रोक्षणमर्हति ॥

देवद्रोणीग्रहणमन्नबहुत्वप्रदर्शनार्थं देवलः -
रक्तधान्यादि राशीनामेकदेशस्य दूषणे ।
तावन्मात्रं समुद्धृत्य शेषं प्रोक्षणमर्हति ॥

विष्णुः - द्रोणाधिकसिद्धमन्नमुपहतं न दुष्यति ।
तस्योपहतस्य गायत्र्याभिमन्त्रितं स्वर्णाम्बु क्षिपेत् ॥

काकैः श्वभिश्च संस्पृष्टमिति तत् स्पर्श एव दोषाभावोक्तेस्तद्भुक्तं सर्वथा न भक्षणीयम् ।

अत एव स्पर्शे भक्षणशंकया न भक्षयेत् । तस्माद् भक्षणाभावनिश्चये भक्षणे न दोषः । द्रोणो मानविशेषः ।

धान्यादिमानम्

विष्णुधर्मोत्तरे - पलं च कुण्ड्यः प्रस्थ आढको द्रोण एव च ।
धान्यं मानेषु बोद्धव्याः क्रमशोऽमी चतुर्गुणाः ॥
द्रोणैः षोडशभिः खारी विंशत्यः कुम्भ उच्यते ।
कुम्भैस्तु दशभिर्वाहो धान्यसंख्या प्रकीर्त्तिताः ॥

गोपथब्राह्मणे - पञ्चकृष्णलको माषः तैश्चतुःषष्टिभिर्पलम् ।
पलैर्द्वात्रिंशद्भिः प्रस्थो मागधेषु प्रकीर्त्तितः ।

आढकस्तैश्चतुर्भिस्तु द्रोणः स्याच्चतुराढकः ॥

अत्र लौकिकाष्टमाढमितं पलम् । तेन द्वात्रिंशत्पलेन प्रस्थः । एवं च प्रस्थः षोडशपलत्वं षोडशमाढात्मकं पलाभिप्रायम् । वैद्यशास्त्रे तथैव व्यवहारात् ।

तथा च - खारी द्रोणाढकप्रस्थाः कुडयश्च पलं विदुः ।
आढको माषकश्चेति संख्या पूर्वं चतुर्गुणाः ॥

इति धान्यादिमानम् ।

आपस्तम्बः - 'अप्रयतोपहतमन्नमप्रयतं न च भोज्यम्' । अग्नावधिश्रयणादिना शुद्धं कृत्वा भोज्यं भवतीति । एतच्च प्रयतब्राह्मणस्पृष्टविषयम् ।

प्रयतेनापि शूद्रेण स्पृष्टस्य सर्वथा भोज्यत्वाभावात् । 'पदा स्पृष्टं तु कामत' इति मनुयाज्ञवल्क्याभ्यां येन पदा स्पृष्टस्यान्नस्य निषिद्धत्वेऽपि पदा स्पृष्टमवक्षुतमन्नं भुक्त्वा सप्तरात्रं पयसा वर्त्तेत इति स्मृत्यन्तरे अवक्षुतसाहचर्यात्तत्पादस्पृष्टेऽपि क्षुतोक्तशुद्धिस्तदकरणे दोषः ।

न तु 'पादौ शुची ब्राह्मणानाम्' इति बृहस्पत्युक्तिः । 'पदा स्पृष्टं तु कामत' इत्यस्यापवादः इति चेत्, सत्यम् । अयमपवादः । तत्र पादस्पृष्टद्रव्यान्तरे एव न त्वन्ने पूर्वोक्तविशेषोक्तेः । इति षट्कस्य ॥ ९७-१०२ ॥

अन्नं शूद्रोपहतं न भक्ष्यमित्युक्तितः स्यात् खदिरं हि भक्ष्यम् ।
शूद्रादिभिः पक्वमपीह नोक्ता यदन्नतो यच्च वदन्ति वृद्धाः ॥ १०३ ॥
पूर्णं च ताम्बूलगतं हि भक्ष्यं तस्यास्थिजत्वेऽपि हि भक्ष्यता यत् ।
परं तु प्राण्यङ्गजता प्रयुक्तामिषन्त्यतस्तद्व्रतिभिर्न भक्ष्यम् ॥ १०४ ॥

प्राचीनाः - खदिरं यद्यपि शूद्रादिभिः पच्यते तथापि शूद्रोपहतमन्नमभोज्यं इत्यन्नादयो न भक्ष्यन्ते । खदिरे तु पाककाले पेयत्वलेह्यत्वयोरेवाभावान्नाभक्ष्यतेति । यथा काष्ठे दग्धे भस्मीकृते न काष्ठत्वं तथा चूर्णे नास्थित्वम् । किन्तु भस्मत्वमेव । तेन नाभक्ष्यता । न ह्यभक्ष्यद्रव्यजं भस्माप्यभक्ष्यं निषेधाभावात् । केवलम् -

प्राण्यङ्गमामिषं चूर्णं क्षीरं गव्येतरं तथा ।
आमिषं च मधु प्रोक्तं कांस्यभोजनमामिषम् ॥

आमन्दरीशाकं चर्मपानीयमामिषम् इति वाक्यदर्शनात् ब्रह्मचार्यादीनामभक्ष्यम्। नव्यास्तु तदन्नं परिणाममयमिति दक्षोक्तेस्ताम्बूलसहभरितखदिरचूर्णयोः भक्ष्यत्वमिति विधिः ॥ १०३-१०४ ॥

पक्वान्नमप्यापदि भक्षणार्थमुक्तं गृहस्थाश्रमसंस्थितौ तु।
निःस्वातुरप्रेषितपान्थसर्वकुटुम्बहीनैः न तु भोजनीयम् ॥ १०५ ॥
रथ्याहृतं चाप्रयताहृतं तच्चेत्पावकाधिश्रयणोक्षणाद्यैः।
योग्यं सुरार्चाबलिभोजनेषु पूर्वं भूदेवाविनिवेदितं चेत् ॥ १०६ ॥
स्वस्थैः गृहस्थैरपि भक्षितान्नं पुरस्क्रियादौ विहितं हि भक्ष्यम्।
भिक्षा तु सा भूरिजनेभ्य एव न ह्येकभोज्यविति वृद्धविज्ञाः ॥ १०७ ॥
अन्यैः गृहस्थैस्तु न पक्वमन्नं याच्यं विपत्तावपि वा कदाचित्।
शुच्याममन्नं तु सदापि याच्यं भिक्षा यतो ब्राह्मणवृत्तिरुक्ता ॥ १०८ ॥

चतुर्भिः कुलकम्।

गृहस्थाश्रमिणः पक्वान्नयाचनं निषिद्धमपि आतुरादीनां याच्यं भोज्यं च।

व्याधितस्य दरिद्रस्य कुटुम्बात् प्रच्युतस्य च।
अध्वानं वा प्रपन्नस्य भिक्षाचर्य्या विधीयते ॥ इत्युक्तेः।
सिद्धमन्नं गृहस्थाय वानप्रस्थाय गोरसम्।
यतये काञ्चनं दत्त्वा नरकं प्रतिपद्यते ॥ इति।

तत् - स्वपाके विद्यमाने यः परपाकं निषेवते।
सोऽश्वत्वं सूकरत्वं च गच्छति। इति वाक्यानुरोधात् विद्यमानस्वगृहपाकपरमेव। अन्यथा तेनापि सख्यादीन् संप्रति गृहमागतान् सत्कृत्यान्नं यथाशक्ति भोजयेदित्याद्युक्तिविरोधः स्यात्।

'यदन्नाः पुरुषा राजन् तदन्नाः पितृदेवताः' इति रामायणोक्तेर्यदन्नं दद्यात्तन्नाश्नीयात् इत्युक्तेश्च भिक्षान्नैर्वैश्वदेवादि कार्य्यम्। तथाहि द्रौपदीस्वयंवरानन्तरं पाण्डवैराहृते भिक्षान्नेऽग्रभागं वल्यर्थं कुर्वतीं द्रौपदीं प्रति कुन्त्योक्तम्। केवलमेकत्र विनियुक्तस्य निरिष्टकाख्यस्यान्यत्र विनियोगो न हित्वा प्रयत्नेनैवेहा विनियुक्तमेव भैक्ष्यं ग्राह्यम्।

'शुचिर्भैक्ष्यं कारुहस्तं पण्यं रथ्यागतं च यदि' त्युक्ते रथ्यागतमपि तन्नाशुद्धम्। केवलं भैक्ष्यादन्यत्र पक्वान्नं रथ्यानीतमप्रयतोपहतं न भोक्तव्यानीत्युक्ते-रग्न्यादिश्रयणेक्षणादिना शुचि संपाद्य देवतायै देयं भोज्यं च।

यद्यपि भैक्षात् परमयाचितमित्युक्तं तथापि नांगतया भैक्ष्यनियमात् जपादौ भक्ष्यैव।

योगीयाज्ञवल्क्यः- चरुर्मूलं फलं क्षीरं दधि भिक्षान्नसक्तवः।

एतत् सप्तविधं प्रोक्तं पवित्रं व्रतभोजनम् ॥ इति।

'भैक्ष्या वाऽसवर्णेभ्य एवान्नं वा द्विजातिषु' इत्यादिषु भैक्ष्यप्रतियोगितयैकान्नस्याभिधानात् पङ्कजादिवदन्नं गृहयाचितमेव भैक्ष्यम्। तेनैकत्र पर्य्याचान्तप्राप्तावपि भैक्ष्यत्वसिद्ध्यर्थमित्यतोऽपि यत् किञ्चिदग्राह्यम्।

एतदितरगृहस्थानां तु -

अनापदि चरेद्यस्तु सिद्धां भिक्षां गृहे वसन्।
दशरात्रं पिबेद्वज्रमापत्काले त्र्यहं द्विजः ॥ इति।

सिद्धान्नभिक्षानिषेधेऽपि -

'मृतं तु याचितं भैक्ष्यं' 'षट्कर्म्मैको भवत्येषां' मिति सामान्यतो भैक्ष्यविधेरामान्नग्रहणं युक्तम्। मृतमिति याचितस्य संज्ञा। उक्तञ्च -

ऋतमुञ्छशिलं ज्ञेयममृतःस्यादयाचितमिति (४-५)। इति मनूक्तेः।

एषां चतुर्वर्णानां मध्ये एको ब्राह्मणः षट्कर्म्मेत्यर्थः। स्नातस्य मिक्षाचरणमत्यशुचिकरत्वाभिधानं सिद्धान्नपरमेव। न च कल्पमानेष्वर्थेषु इहैतादर्थानीति निषेधात् द्रव्यभावत्वप्राप्तिः। आत्मतयैव शुभायातं नियुञ्ज्यात् भृतिके परमिति। अशुभायां द्रव्ये सत्यपि आत्मार्थं शुभाजीवनस्य विहितत्वात् परं भैक्ष्यम्' इति।

भिक्षा तूक्तैव निग्रहो भिक्षा नैव प्रतिग्रहः।
असत्ये वासता वापि भिक्षान्नं नैव दुष्यति ॥
इत्यादिना प्रशस्तं भैक्ष्यं सत्यप्यन्यद्रव्ये प्राप्तम् ॥ १०५-१०८॥

स्विन्नत्वदोषः क्रमुको हरिद्रामरीचपुंनागफलेषु धान्ये ।
नैवास्ति तेषामशनं तु शूद्रैः स्पर्शे समाचारकृतो वदन्ति ॥ १०९ ॥
शुद्रादिस्पर्शेन दुष्टता न स्विन्नेषु पूगादिषु शोषणं चेत् ।
अशोषणे त्वत्र महद्विगानमेवं वदन्त्यत्र तु केचिदार्य्याः ॥ ११० ॥
यद् वाग्नि योऽकठिनेषु सम्यक् सर्वांगसङ्गः स हि पाकभक्तः ।
पूगादिके यत् स न विद्यते तन्न स्विन्नता स्पर्शकृतेऽपि दोषः ॥ १११ ॥
द्विपाकः दोषोऽक्षतपक्वचूर्णादिना कृते मण्डुकपिष्टकादौ ।
न स्विन्न उक्ते पृथुके हरिद्रामिषामरीचादिषु शर्करादौ ॥ ११२ ॥
द्विःपक्वता संस्करणेऽपि न त्वामिषादिपूपेऽन्यदिके शुभाद्यैः ।
पूर्वेऽह्नि संस्कृत्य तु किञ्चिदन्यदिनेऽपि पक्वे पलले तथैव ॥ ११३ ॥
यदर्द्धपक्वं कदलीफलादि दिनान्तरे तत् पचनेऽप्यदोषः ।
द्वितीयघस्रे पचनस्य तेषां सम्पूर्णभावादिति युक्तिमाहुः ॥ ११४ ॥
भक्ष्यं हि शूद्रादपि चेक्षु पक्वलाजादितैलादि च गोरसाश्च ।
गोधूमापूपादिकमूलकन्दादेः स्नेहपाकेऽप्यशनं न शूद्रात् ॥ ११५ ॥
शुष्कोऽप्यपक्वादिकसर्वशूद्रस्पर्शे समाचारकृतं विपाकम् ।
एवं समाचारत एव सर्वं ज्ञात्वा विदध्यादिति शिष्टवृद्धाः ॥ ११६ ॥
स्पृष्टे तु शूद्रैरपि तण्डुलादौ स्विन्ने समाचारकृताश्रिता यत् ।
ततोऽन्तकत्वेन हि वैष्णवैवान्नत्वाविशेषादपि पक्वगव्ये ॥ ११७ ॥
वाह्यौदकापक्षणहीन वन्दिमात्रैकपक्वं खलु कन्दुपक्वम् ।
सस्नेहपक्वं कदनं यदम्बुविहीनः सर्पिः प्रमुखैकपक्वम् ॥ ११८ ॥

शिष्टाः - मरीचधान्ययोश्चैव हरिद्राणां तथैव च ।
पुंनागादिफलानां च स्विन्नदोषो न विद्यते ॥

एषां स्विन्नानामपि शूद्रस्पर्शेऽपि भक्षणसमाचारत् । स्विन्नस्य स्पर्शदोषसिद्धत्वाभावयोः समाचारैकप्रमाणत्वात् । इति प्राञ्चः ।

केचित्तु अकठिनद्रव्येषु अग्निना सर्वावयवयोगः पाक इति लक्षणात् । पूपादिके तल्लक्षणस्य भावान्न स्विन्नतादोषो नापि तत्र स्पर्शदोष इति वदन्ति । अन्ये तु

स्विन्नपूपादीनामशोषणे तेषां रूपत्वेन अवयवसंयोगभेदरूपपक्वतानिवृत्तेः पर्युषिताप्रयतशूद्रस्पर्शादिनाऽपि न दोष इत्याहुः ।

तण्डुलादिचूर्णमादौ पक्त्वा पुनः पाकेन सिद्धे मण्डुकलड्डुकपिष्टकादौ न द्विपाकदोषः । स्विन्नधान्यादीनां द्विपाकदोषाभाव इति केचित् निबन्धकाराः । यत्तु धान्यं स्विन्नं तच्छोषणेन धान्यमेव जातम् । तस्य स्विन्नता धान्ये गुणसंपादनार्था । न त्वोदनार्था । तेन तण्डुलदशायामेवान्नार्थं पाक इति न द्विपक्वतेत्याहुः ।

एवं चिपिटकहरिद्रामरीचादिषु बोध्यम् । एषां भक्ष्यपर्युषितप्रकरणे वक्ष्यमाणत्वात् । आवर्त्तितदुग्धस्य पुनः पाके दोषोक्तावपि आमिक्षायै आतञ्चनदानानन्तरं पुनः पाकेनैव सिद्धेर्न कापि दोषः । एवं सति आमिक्षाकृते पूपादावपि न दोषः । तत्र पूपस्य तथात्वेनैव सिद्धत्वात् । गुडस्य पाकत्वेऽपि पुनः पाकेनैव शर्करादित्वं, तेन न तत्रापि दोषः । वस्तुतस्तु स्विन्नधान्यजन्यतण्डुलादि-भक्षणे ब्रह्मवैवर्त्तेऽस्मद्देशादौ व्यवस्था लिखिता -

द्विः स्विन्नमन्नं पृथुकं शुद्धं देशविशेषकम् ।
नान्यत्र शस्तं विप्राणां भक्षणे च निवेदने ॥
अभक्ष्यं तद् यतीनां च विधवाब्रह्मचारिणाम् ॥
तपस्विनां च विप्रेन्द्र गोमांससदृशं ध्रुवम् ॥

एवं देशविशेषपदेन गौडोत्कलादीनां प्रतिग्रहः । एषु देशेष्वेव स्विन्नान्न-चिपिटकादिभक्षणाचारदर्शनात् । अत्र यत् केचित् गौडतिथितत्वानुसारेण 'हैमन्तिकं सिता स्विन्नं धान्यं मुद्गास्तिला यवा' इति हविष्यप्रकरणे उक्तत्वात् तदन्यकाले स्विन्नतण्डुलान्नभक्षणे न दोष इति युक्तिं कुर्वन्ति । सा न समीचीना । तथा सती स्वतोऽप्यभक्ष्याणां पूतिकादीनां तिथिविशेषे धान्यान्नप्रभृतीनां तेषामप्यन्यतिथिषु भक्ष्यता प्रसज्यते ।

अथ वक्तव्यं येषां तद् भक्ष्यं तेषामपि तन्निषेधार्थमुक्तम् । न सर्वेषामिति चेत् स्विन्नधान्यजनिततण्डुलेऽपि सा युक्तिर्दुर्निवारैव । दिनान्तरे आमिक्षायाः कृते पूपादौ पुनर्दिनान्तरे गुडपाकादिना संस्कारतोऽपि न दोषः । तथा मांसादिकं प्रथमदिनेऽप्यसिद्धावस्थपाकं दिनान्तरे पच्यते चेन्न तत्रापि द्विःपाकदोषः । एवं यत्

कदलीफलादि दिनान्तरे पच्यते न तत्रापि द्विपाकदोषः। सर्वत्र युक्तिः दिनान्तरे पाकस्य सिद्धत्वादेवेति।

हारीतः - कन्दपक्वं स्नेहपक्वं पायसं दधिसक्तवः।
एतानि शूद्रान्नभुजो भोज्यानि मनुरब्रवीत्॥

कौर्मे - कन्दपक्वानि तैलानि पायसं दधिसक्तवः।
द्विजैरेतानि योज्यानि शूद्रागेहकृतान्यपि॥

पायसपदेनात्र दुग्धाविकारो न परमान्नम्।

गोरसं चैव सक्तूंश्च तैलं पिण्याकमेव च।
अपूपान् भक्षयेत् शूद्राद् यच्चान्यत् पयसा कृतम्॥

इत्याङ्गिरसोक्तेः।

एवं शास्त्रसत्त्वेऽपि गोधूमादिविकारस्य जलनिरपेक्षगोरसमात्रपक्वस्य कन्दुपक्ववत् शूद्राद् ग्राह्यत्वोक्तावपि समाचारविरोधाज्जलादिमिश्रणशंकातश्च वर्जनं भक्षणे विपानं च। एवं जललवणनिरपेक्षस्नेहमात्रपक्वमूलफलादेरपि बाह्यजलाभावेऽपि पाककाले तत्तन्निःसृतजलस्य दृश्यमानत्वात् केवलपक्वताभावात्तद्भक्षणेऽप्यस्मद्देशे विधानाचार आसन्निति शिष्टा वदन्ति।

शूद्रकृतकटीपर्पटादौ शुष्के सति स्विन्नधान्यादिवद् दोषाभावेऽपि तद्भक्षणाभावः। समाचारमूल इति सर्वमाचरतः ग्राह्यमिति शिष्टवृद्धाः। अतएव परमान्नादिव्यतिरिक्तपयोविकारादीनां भक्षणं निर्विगानम्। एवं च -

गोरसे कन्दुशालायां तैलयन्त्रेक्षुयन्त्रयोः।
अमीमांस्यानि शौचानि स्त्रीषु राजकुलेष्वपि॥

इति शातातपोक्तवचनेऽशौचापवादो यथाचारं गृह्यते। एतेषां पाकदोषरहितत्वेऽप्यनित्यत्वाविशेषात् शूद्रसम्बन्धितत्वात्। मरणासन्नकाले वर्जनम्। यथा यतस्ततोऽप्याप इत्याद्यङ्गिरोवचनं तु शूद्रापादानकं प्रतिग्रहलब्धविषयमिति वक्ष्यते।

तस्मात् शूद्रास्पृष्टं स्विन्नतण्डुलादीनां तत् पक्वगोरसादीनामपि मरणासन्नकाले सर्वथा वर्जनम्। कन्दुपक्वादिलक्षणं विज्ञानेश्वरादिशिष्टनिबन्धनेषु यथा।

कन्दुशब्देनापि स्थानवाचिनाऽग्निर्लक्ष्यते । तेन बाह्यजलनिरपेक्षवह्निमात्रेण पक्वं लाजादिकं कन्दुपक्वमुच्यते । एवं जलनिरपेक्षेण केवलं घृतादिना पक्वं स्नेहपक्वमुच्यते । इति दशकस्य ॥ १०९-११८ ॥

स्नेहाक्तमन्नं कृशरं यवागुः पूपाश्च शाकं परमान्नमांसे ।
सकन्धुश्च मन्थं वाटकः करम्भःफलं च मूलं पृथुकाश्च धानाः ॥ ११९ ॥
गोधूमपूपा यवपिष्टकाश्च स्नेहेन हीना अपि गोरसाश्च ।
रागांशुकाषाऽवसंकिलेहा गौडो विकारो निखिलौषधानि ॥ १२० ॥
एतानि भक्ष्याणि तु सात्मगन्धरसानि चेत् पर्युषितान्यपि स्युः ।
भक्ष्यं तु यत् पर्युषितं निरुक्तं पुनर्न चैतत् प्रचनीयमेव ॥ १२१ ॥
त्रिभिः कुलकम् ।

न माक्षिके पर्युषितत्वदोषस्तत्क्षत्रियादेः परमाश्यमुक्तम् ।
श्राद्धे तथा तन्मधुपर्क एव विप्रस्य भोज्यं यदि वौषधेऽपि ॥ १२२ ॥
एषूद्भवेत् पर्युषितं यदम्लं तदन्नमिश्रं सदपि ह्यभक्ष्यम् ।
प्रपानकं क्षीरगुडाक्तं दध्यान्वितोऽन्यघस्रे न हि भक्षयन्ति ॥ १२३ ॥
पूर्वं समाच्छादितमेव भक्ष्यं प्रक्षाल्य वा पर्युषितं विपत्तौ ।
रात्र्यन्तरीयं त्वपि वाजपेयादि हव्यशेषादि हि भक्षणीयम् ॥ १२४ ॥
अम्लादिकं शस्तफलप्रसूनकन्यादिकं चेदविकारकारी ।
स्वस्थेऽपि रक्तादिविनाऽपि शुक्रं भक्ष्यं यथात्यम्लरसालमुख्यम् ॥ १२५॥
संछादितं पूर्वमुतापि शुक्तं प्रक्षाल्य भोज्यं कथितं विपत्तौ ।
शुक्तेषु शुद्धं दधिसर्वभक्ष्यं दध्युत्तमं काञ्जिकमत्र किन्तु ॥ १२६ ॥
अपक्वता शुद्धफलेन योगो गृहस्थितश्चेति विशुद्धिहेतुः ।
संस्पृष्टमन्यल्लसुनाद्यभक्ष्ये भक्ष्यं पुराच्छादनधामनाभ्याम् ॥ १२७ ॥
क्वाथः सरोगान् प्रतिशुद्धभक्तः पक्वाश्रयस्थानगतो भवेच्चेत् ।
नित्यादिकर्माधिकृतं तु तेषां तनोत्यमुष्यापि कषायसंज्ञा ॥ १२८ ॥
तैलं घृतं सर्षपनारिकेलस्नेहादिकं स्नेहपदेन बोध्यम् ।
जलेन धौतं न च साकमन्नं पक्वं भवेच्चेत् कृसरं तदैतत् ॥ १२९ ॥

संचूर्णिता चेद्द्विविधापि धाना सञ्छुकरम्भो दधिमिश्रसक्तुः ।
सक्तुर्यदा शीतजलाज्यमिश्रान्यच्छोऽतिसान्द्रे न च मन्थमुक्तम् ॥ १३०॥
भृष्टो यवो व्रीहिरपूपापि धाना वाटिति सिद्धो वटकः स्वनाम्नाम् ।
रागांशुकोमंशुकगालेता चेल्लेह्यायुता दाडिममंसमुच्चैः ॥ १३१ ॥
लेह्यास्तु स्वाद्वम्लकटु प्रजुष्टा ये स्युर्गता षाडवसंज्ञकास्ते ।
वैद्यास्तु कल्माषकधान्यकुण्डाद्विसाधितं काञ्जिकमीरयन्ति ॥ १३२॥
सुस्नेहमुक्तं लवणोक्तमन्यरसं च पितन्त्वरयोगतोऽम्लम् ।
फलादिशुक्तं त्वितिशुक्तभेदो नीरादिकस्यापि तथाम्रमुख्यम् ॥ १३३॥

याज्ञवल्क्यः - अन्नं पर्युषितं भोज्यं स्नेहाक्तं चिरसंस्थितम् ।
अस्नेहा अपि गोधूमयवगोरसविक्रियाः ॥(१-१६९)

यमः - अपूपाश्च करम्भश्च धानावटकसक्तवः ।
शाकं मांसमपूपं च सूपं कृसरमेव च ॥
यवागूं पायसं चैव यच्चान्यत्स्नेहसंयुतम् ।
सर्वं पर्युषितं भोज्यं शुक्तं च परिवर्जयेत् ॥

अपूपा गोधूमपिष्टविशेषाः । पूपाः पुलिका इति यावत् । मन्थसक्तुविकारत्वात् सक्तुग्रहणेन मन्थग्रहणम् । तथा च चरके -

सक्तवो घृतसंमिश्राः शीतवारिपरिप्लुताः ।
नातिसान्द्रा न चात्यच्छ्वा मन्थमित्यभिधीयते ॥ इति ।

एतान्येव पर्युषितत्वेन यदि रसान्तरमापद्यन्ते तदा न भक्षणीयेत्युक्तं 'शुक्तं च परिवर्जयेदि'ति वचनान्तरे प्रायेणान्यरसोत्पत्तेः शुक्तग्रहणम् । रसान्तरमात्रत्वेऽप्यभक्ष्यत्वात् ।

शंखलिखितौ- 'न पर्युषितमन्यत्र रसं शुक्ता षाडवदधिगुडगोधूमयवपिष्टकविकारेभ्यः।' आपस्तम्बः-

पर्युषितं वर्ज्यमुक्त्वा फणितपृथुकतण्डुलशाकौषधिवनस्पतिफलमूलवर्जमिति। फणितं इक्षुविकारः पाककजन्यः । एतत्सर्वं गुडविकारस्याप्युपलक्षणम् । पृथुकतण्डुलाः भृष्टधान्यकुट्टननिष्पाद्याश्चिपिटका इति ।

भविष्ये - कालादुष्टं तु विज्ञेयं ह्यस्तनं चिरसंचितम् ।
दधिभक्ष्यविकाराश्च मधुवर्जं भविष्यति ॥

इति उक्तत्वात् माक्षिकं न वर्ज्यम् । माक्षिकस्य भक्ष्यत्वं क्षत्रियादिविषयम् । ब्राह्मणस्य तु श्राद्धमधुपर्कयोरेव भक्ष्यं रोगचिंकित्सायामौषधेऽपि भक्ष्यम् । तत्प्रमाणं वक्ष्यते । अभक्ष्यं प्रकृत्य हारीतः -

'न पर्युषितमन्यत्र गुडपिष्टकगोरससर्षपतैलादिपक्वान्' ।

तैलादित्यादिपदेन सर्षपनारिकेलादिस्नेहग्रहणम् । न भक्षयेदित्यनुवृत्तौ सुमन्तुना 'पर्युषितं पुनः सिद्धं भुक्त्वा त्र्यहमाचरेदिति' । प्रायश्चित्तस्योक्तत्वात् पर्युषितं पुनः सिद्धं कृत्वा च भक्ष्यम् ।

अपूपधानाकरम्भसक्तुयावकतैलपायसशाकानि वर्जयेदिति सर्व-पर्युषितोपलक्षकवसिष्ठवचनादेषां पूर्वोक्तरीत्या पर्युषितदोषाभावेऽपि कालान्तरवासद्रव्ययोगाभ्यामम्लत्वेन दुष्टत्वात् द्रव्यान्तरयोगेऽप्यभक्ष्यम् । अस्मात् शिष्टाः पर्युषितप्रपानके दुग्धे तत्सारे गुडयुक्तदध्यान्नादिके दिनान्तरेऽम्लत्वस्य नियतत्वात् दुष्टत्वेन तानि न भक्षयन्ति । न भक्षयेदित्यनुवृत्तौ गौतमः -

'शुक्तं तु केवलमिति ।'

आपस्तम्बोऽपि - शुक्तं चापरयोगमिति । नास्ति परेषां द्रन्यान्तता योगो यस्येति समासः ।

एवं सति शुक्तं भक्तादिद्रव्यान्तरयोगं विना केवलमभक्ष्यम् ।

कन्दमूलफलादीनि सस्नेहलवणानि च ।
यत्र द्रव्येऽभिषूयन्ते तच्छुक्तमभिधीयते ॥

इति वैद्यशास्त्रलक्षणात् । अडङ्गा इति प्रसिद्धं जलादिस्थापितं यद्द्रव्यं तदन्यदपि शुक्तमिति प्रतिभाति । शुक्तलवणेऽम्लत्वमर्थसिद्धत्वान्नोक्तम् । विज्ञानेश्वराः- 'यदन्यरसं द्रव्यं द्रव्यान्तरयोगपरिवासाभ्यां अम्लं भवति तच्छुक्तमिति' । लक्ष्मीधरोऽपि -

'यदन्यरसं द्रव्यं द्रव्यान्तरयोगेनाम्लं तच्छुक्तमिति' ।

एवं 'चात्यम्लं शुक्तमाख्यातं गर्हितं ब्रह्मवादिभि' रिति बृहस्पत्युक्तेः अयमित्यर्थः। यच्छुक्तमत्यम्लं तद् ब्रह्मवादिभिः गर्हितमाख्यातं कथं चात्यम्लं द्रव्यान्तरसंयोगं विना। तेन शुक्तं तु केवलमित्यस्यैव समानार्थमिदं न त्वम्लमात्रं शुक्तम्।

अत्यम्लचूततिन्तिडीफलादौ केवलभक्षणे विपानाभावात्। शुक्तार्थस्य नानार्थत्वापाताच्च। दधिनि काञ्जिकायां स्मृतिषु शुक्तप्रयोगत्वे लक्षणसत्वादेव।

बृहस्पतिः - दधिभक्ष्यं शुक्तमपि सर्वं च दधिसम्भवम्।
कन्दमूलफलैः पुष्पैः शस्तं शुक्तासवं च यत्॥
अविकारि भवेन्मेध्यममेध्यं च विकारकृत्॥

शुक्तं चासर्वं चेति द्वन्द्वः। शस्तकान्यादिकृत् सन्धानकृताम्लमेव द्रव्यमविकारि अम्लोदकं चेत्तदा शुक्तम्। तच्च द्रव्यान्तरयोगं विनापि भक्ष्यम्। मूलादिसन्धान-कृताम्लमेव विकारकृन्मादकं चेत्तदा सवशब्दवाच्यम्। द्रव्यान्तरयोगे तद्योगेऽप्यभक्ष्यमित्यर्थः।

यमः - शुक्तानि हि द्विजोऽन्नानि न भुञ्जीत कदाचन।
प्रक्षालितानि निर्दोषादापद्धर्मो यदा भवेत्॥
मसूरं मांससंयुतं तथा पर्युषितं च यत्।
तत्तु प्रक्षालितं कृत्वा भुञ्जीत ह्यभिधारितम्।

तथा चापदि शुक्तं द्रव्यान्तरयोगं विनापि प्रक्षालितं भुञ्जीत। एवं मसूरमांसादियुक्तं संसर्गदुष्टं यत् किञ्चिद्द्रव्यमप्यापदि प्रक्षालितं भुञ्जीत। अभिधारितं पूर्वमाच्छादितम्। पर्युषितापवादे मनुः - 'हविःशेषं च सर्वत्र' इति। न रात्र्यन्तरितं वाशिपेयादिह हविः शेषादि भक्ष्यमित्यर्थः। काञ्जिकस्य शुक्तान्तर्गतत्वाशुद्धत्वेऽपि विशेषमाहुः विज्ञानेश्वराः -

काञ्जिका सफला ग्राह्या गृहेषु स्थापिता भवेत्।
तस्यास्तु काञ्जिका ग्राह्या नेतरस्याः कथंचन॥ इति।

तस्मात् शुद्धफलयुक्त गृहस्थापितकञ्जिकातः उद्धृत्य भक्षणीयमिति। अस्मद्देशे शिष्टा अपि शुक्तशब्दाद्द्रव्यान्तरयोगं विनापि भक्ष्यतेत्याहुः।

सुरामरिष्टमैरेयं मधुमाध्वीकमासवम्।
धान्याम्लं शुक्तवर्जं च न पेयं ब्राह्मणैर्विदुः ॥

धान्याम्लं काञ्जिकम् इति । देवलवचनेन काञ्जिकस्य मादकत्वाभावेनासवत्वाभावेऽपि पक्वौषधिसिद्धत्वेन अरिष्टत्वाद् भक्ष्यत्वं प्राप्तम् ।

शुद्ध्यापादकवचनेन निवारितमिति न कश्चिद् विरोधः । न हि पर्युषिता सा काञ्जिका । पर्युषितत्वात् पुनः पाके दोषः स्यादेव । एतेन यवान्नसाध्यं सौवीरं रसदुष्टत्वादुपेक्ष्यम्। तत्र पर्युषितत्वाभावात्। मनुः(११-१५३) -

शुक्तानि च कषायांश्च पीत्वा मेध्यान्यपि द्विजः।
तावद् भवत्यप्रयतो यावत्तन्न व्रजत्यधः ॥

शुक्तानि मेध्यानि दध्यादीनि । तथा कषायाश्च दशमूलकाथप्रभृतीन् मेध्यान् पिबतः पक्वाशयस्थानगमनपर्यन्तं कर्मानधिकारः । तैलं घृतमित्यादि नीरादिस्थापितमित्यन्तेषु पञ्चसु श्लोकेषु साक्षिवचनानि वैद्यशास्त्रादिष्वनुसन्धेयानि तत् प्रत्यधिकविग्रहभावात् ग्रन्थगौरवभयेन न लिखितानि । इति पञ्चदशकस्य । इति पक्वान्नशुद्धिः ॥ ११८-१३३ ॥

अथामान्नादिशुद्धिः

योनैतिकश्राद्धयुतोऽपि शूद्रो हीनैकयोग्यं वितरेद् विपत्तौ।
द्रव्यं यदामं तदपि द्विजेन ग्राह्यं न पक्वं न च पार्थिकं च ॥ १३४ ॥
विप्रस्तु शूद्रात् प्रतिगृह्य दद्यात् यत्तस्य पाकेऽपि न दोष उक्तः।
आसन्नमृत्योरपि तत्पदार्थाशनेऽपि तस्मान्न हि दोष शंका ॥ १३५ ॥
भोज्यमथान्ना गदितासु शूद्राः सप्त स्वदासः सकुलस्य मित्रम्।
आत्मीयगोपालकनापितौ च यः कर्षकः कर्षणभागहारी ॥ १३६ ॥
दोषं गुणं स्वस्य निवेद्यकर्म मनःशरीरैस्तव चाहमित्थम्।
समर्पितो यः स च सप्तमस्तु हिङ्ग्वादिविक्रेतृ वणिक् तथैव ॥ १३७ ॥

स्वकुम्भकारो गणितोऽपि शास्त्रे देशेऽस्मदीये तु महद्धिगानम्।
स शूद्रतुल्यो गुडकारजातौ जातः स यन्नैव निषिद्ध उक्तः॥ १३८॥

मनुः(४-२२३) - नाद्यात् शूद्रस्य पक्वान्नं विद्वानश्राद्धिनो द्विजः।
आददीताममेवास्माद् वृत्तावेकरात्रिकम्॥

अश्राद्धिनो नित्यश्राद्धमकुर्वतः। अश्राद्धिनो इत्युद्देशविशेषणत्वात् अविवक्षितेन श्राद्धिनोऽपि पक्वान्नमग्राह्यमेव। अवृत्तौ आपदि। 'नित्यमत्र वसेद् वृत्तं प्राप्योपरमेते' त्यापस्तम्वोक्तिरेव तत् समानार्था। शूद्रान्ने आसक्तो न भवेदित्यर्थः।

यमहारीतजमदग्निपैठीनसयः -

ब्राह्मणान्नं क्षत्रियान्नं वैश्यान्नं शूद्रमेव च।
तां तां योनिं व्रजेद् विप्रो भुक्त्वान्नं यस्य वै मृतः॥

शूद्रान्नं भुक्त्वा मरणे हारीतः -

'स वै खरत्वमुष्ट्रत्वमश्वत्वं वाऽधिगच्छति'।

वसिष्ठः - शूद्रान्नपरिपुष्टांगो ह्यधीयानोऽपि नित्यशः।
जुह्वन् वापि जपन् वापि गतिं पूर्वं न गच्छति॥
शूद्रान्नेन तु भुक्तेन मैथुनं योऽधिगच्छति।
यस्यान्नं तस्य ते पुत्रा न तु स्वर्गार्हको भवेत्॥

अतः स शूद्रादपि मरणसन्निधाने आसन्नस्यापि भोजनं त्याज्यमेव।
षण्मासान् यो द्विजो भुंक्ते शूद्रस्यान्नं विगर्हितम्।
स च जीवन् भवेच्छूद्रो मृतः श्वा चाभिजायते॥

इति वचनं षण्मासावधिकत्वोक्तिब्राह्मणाधिकारिककाम्यकर्मानधिकारार्था।

पुनरंगिराः - यथा यतस्ततोऽप्यापः शुद्धिं यान्ति नदीं गता।
शूद्रात् विप्रगृहेऽप्यन्नं प्रविष्टं तत्तथा शुचिः॥

एतत् शूद्रात् प्रतिग्रहविषयम्। तथा च पराशरः -

तावद् भवति शूद्रान्नं यावन्न स्पृशति द्विजः।
द्विजातिकरसंलग्नं सर्वं तन्न विरुध्यते॥ इति।

यमः -   यथा जलं निर्गमनेऽप्यपेयं नदीं गतं तत्पुनरेव पेयम्।
तथान्नपानं विधिपूर्वमागतं द्विजातिहस्तान्तरितं विशुद्धम् ॥

एतेन ब्राह्मणं भोजयामीति बुद्ध्या यदि शूद्र आमान्नं ददाति तत् यदि पक्त्वा तु ब्राह्मणो भुंक्ते तदा शूद्रान्नभोजनं तदेव मरणकाले गर्हितम्।

आमद्रव्यप्रदानविधिना चेद् ददाति तद् यदि पक्त्वा भुंक्ते तदा प्रतिग्रहदोष एव न तु शूद्रान्नभोजनदोषः। प्रतिग्रहलब्धं भुक्त्वा मरणेऽपि न शूद्रजन्मलाभ, इति लक्ष्मीधरः। तत्र प्रशस्तशूद्राः यथा -

याज्ञवल्क्यः(१-१६६) -

शूद्रेषु दासगोपालकुलमित्रार्द्धसीरिणः।
भोज्यान्ना नापितश्चैव यश्चात्मानं निवेदयेत् ॥

दासः स्वकीयः। तल्लक्षणं हारीतेनोक्तम् -

अधिकारी तु यो यस्य स दासः परिकीर्त्तितः इति।

अधिकारः परद्रव्यरक्षणाय व्ययकरणेन उपजीवनम्। गोपालो यो यस्य गाः पालयति। कुलमित्रं यो यस्य पितृपितामहक्रमेण यस्य मित्रम्। अर्द्धसीरि मिलित्वा कर्षकः। नापितः प्रसिद्धः। आत्मनिवेदनं स्वस्य गुणदोषकथनपूर्वकं वाङ्मनकर्मभिस्तवाहमित्यात्मसमर्पणं यः करोति सोऽपि। गौतमेन शूद्रो वणिक् भोज्यान्न उक्तः। स च हिङ्ग्वादिविक्रेतृवणिगेव गृह्यते। स्वर्णकारवणिजस्तु तेषां भोज्यान्नत्वेन वक्ष्यमाणत्वात्। यद्यपि देवलेन -

''स्वदासो नापितो गोपः कुम्भकारः कृषीबलः।
ब्राह्मणैरपि भोज्यान्नाः पञ्चैते शूद्रयोनयः ॥ इति कुम्भकारोऽप्युक्तः।

कुम्भकारनिषेधः परकीयविषय इत्यपि निवन्धकारैः समाहितं तथाप्यस्मद्देशे कुम्भकारस्य सर्वथा नैव भोज्यान्नत्वव्यवहारः। निषेधाभावात्। भोज्यान्नाभोज्यान्नयोस्तदप्रवेशेऽपि आरादेव भोज्यान्नत्वव्यवहारः। इति पञ्चकस्य ॥ १३४-१३८ ॥

अथ प्रसंगादभोज्यान्ना उच्यन्ते -

तक्षा नटो नर्त्तकचर्मकारौ चर्मोपजीवी च सुवर्णकारः ।
अभ्रातृका स्त्री गणिका तु षण्ढो गानादिजीवी रजकःकुलालः ।। १३९।।
स लोहकृत् सौचिक तन्तुवायो धूर्त्ताः खलस्तैलिकशौण्डिकौ च ।
चौरस्तथा वार्द्धकमीनवृत्तिः शूद्रस्य चाध्यापकयाजकौ च ।। १४० ।।
आलेख्यकृद् वेशविधानजीवी विषप्रदः शौनिकपार्णिकौ च ।
प्रयोजनोद्देशमृते तु दाता वृथाश्रमी चाश्रमदूषकश्च ।। १४१ ।।
रंगोपजीवी गुरुगुप्तिकारी पौनर्भवभ्रूणहशस्त्रकाराः ।
तन्त्रोपजीवी पतिताभिशप्ता त्वशौची वैद्यो कुलटा निषादः ।। १४२ ।।
पुण्यैकविक्रेतृगणानि योन्याः स संकरो यः प्रतिलोमजातः ।
कुण्डाशनश्चायुधवीरघाती चाभोजनीयान्नगणः प्रविष्टः ।। १४३ ।।
सद्ब्राह्मणः सन्नपि योऽतिमोहादेतेषु कर्मस्वपि वर्त्तते सः ।
प्रतिग्रहप्राशनकादिके ये प्रायश्चित्तकृदपि नैव योग्यः ।। १४४ ।।

यमः - नटनर्त्तकतक्षाणश्चर्मकारः सुवर्णकृत् ।
स्थाणुर्वा षण्ढगणिका अभोज्यान्नाः प्रकीर्त्तिताः ।
गान्धर्वो लौहकारश्च शुनिकस्तुन्नवायकः ।
चक्रोपजीवी रजकः कितवस्तस्करस्तथा ।।
ध्वजी मीनोपजीवी च शूद्राध्यापकयाजकौ ।
कुलालश्चित्रकर्त्ता च वार्धुषिश्चर्मविक्रयी ।।
समर्घ्यं पण्यमादाय महार्घं यः प्रयच्छति ।
स वै वार्द्धुषिको नाम यश्च वृद्ध्या प्रयोजयेत् ।।

पुनस्तत्र - वृथाश्रमी वृथादाता आश्रमाणां च भेदकः ।
पुण्यस्य विक्रयी यश्च योनिसंकरकश्च यः ।।
रंगोपजीवी कुण्डाशी वीरहा गुरुगुप्तिकः ।
भिषक् च गरदश्चैव रूपाजीवी च सूचकः ।।

शौनिकः पार्णिवश्चैव निषादेन समाः स्मृताः।
कर्मस्वेतेषु यो मोहाद् ब्राह्मणो वर्त्तते सदा॥
प्रायश्चित्तेऽपि चरिते परिहार्य्यो भवेन्नहि।
एते ब्राह्मणचाण्डालाः सर्वब्राह्महीना किल॥
तस्माद् दैवेऽपि पैत्र्येऽपि वर्जितास्तत्त्वदर्शिभिः॥
एतेषामेव सर्वेषां प्रत्यावृत्तं तु मार्गणम्॥
भिक्षान्नमुञ्छभुञ्जानो द्विजश्चान्द्रायणं चरेत्॥
एतेषां ब्राह्मणो भुक्त्वा दत्त्वा कृत्वा प्रतिग्रहम्।
प्राजापत्ये तु शुद्ध्येत तस्मात् पापान्न संशयः॥

स्थाणुका अभ्रातृमती। गान्धर्वो गानवृत्तयः। वृथादाता दृष्टादृष्टप्रयोजनमनुद्दिश्य दाता। आश्रमस्य भेदको दूषकः। गुरुगुप्तिकः गुरु यो गोपयति। रूपाजीवी वेशकरणेन यो जीवति। पार्णिवः पर्णोपजीवी।

सुमन्तुः - 'अभिशप्तपतितपौनर्भवभ्रूणहपुंश्चल्यशुचिशस्त्रकारतान्त्रिकतैलिकध्वजिसुवर्णकारलेखकषण्ढवर्द्धकीगणान्नगणिकान्नानि अभोज्यानि। सौनिकव्याधचर्मकारनिषादा अभोज्यान्ना अप्रतिग्राह्यास्तद्दर्शनप्रतिग्रहयोश्चान्द्रायणं चरेत्। तत् पदेनाभिशप्तादयः। तत्रापि प्रायश्चित्तसाकांक्षितत्वात्। तेनैतेभ्यो दानं निषिद्धमेव॥ इति षट्कस्य॥ १३९- १४४॥

अप्यापणस्थं लवणं तथा मांसं तथा क्षौद्रमपीव शुद्धम्।
श्वव्याघ्रमुख्या स्वनखैस्तथान्यैर्हतो मृगादेः पलकं च शुद्धम्॥ १४५॥
अन्ने विलद्वारकमार्गभस्मस्तम्भाग्निषट्कान्यतमेव भेदे।
अन्ननिकृष्टेन सहैकपंक्तौ पंक्तेस्तथैकापगमेऽपि भक्ष्यम्॥ १४६॥
यद्व्यञ्जनान्नादिकभिन्नभक्ष्यं द्रव्यं गृहीत्वा परिवेषयेद्यः।
उच्छिष्टसंस्पृष्ट इदं गृहीत्वाऽऽचम्यैव दद्याच्छुचिस्तत्र तद्धि॥ १४७॥
अन्नादिकानां परिवेषकाले स्पृष्टो यदोच्छिष्टजलेन लोकः।
भूमौ तदा तद् विनिधाय सम्यक् आचम्य दद्यात्तु तदत्र शुद्धिः॥ १४८॥

वने निशि व्याघ्रभयादियोगे निरम्बुदेशे पथि वा विदध्यात् ।
तद्द्रव्यमादाय पुरीषमूत्रे शौचोत्तरं तच्छुचिनीरसेकात् ॥ १४९ ॥

आपस्तम्ब : - 'आपणीयमन्नमश्नीयात्तथा रसान् आममांसमधुलवणानि परिहाय' ।

मनुः - 'श्वादिग्रहणे मृगः शुचिः ।'
श्वापदं व्याघ्रादेरुपलक्षणम् ।

तथा च स एव(५-१३१) -
श्वभिर्हतस्य यन्मांसं शुचिस्तं मनुरब्रवीत् ।
क्रव्याद्भिश्च हतस्यास्यैश्चाण्डालाद्यैश्च दस्युभिः ॥

अन्यत्र - अग्निना भस्मना चैव सलिलेन विशेषतः ।
द्वारेण स्तम्भमार्गाभ्यां षड्भिः पंक्तिर्न विद्यते ।

मनुः - उच्छिष्टो न तु संस्पृष्टो द्रव्यहस्तः कथञ्चन ।
अनिधायैव तद्द्रव्यमाचान्तः शुचितामियात् ॥ (५-१४३)

इदमन्नव्यञ्जनादिव्यतिरिक्तद्रव्यविषयमिति विश्वरूपः ।

अन्नादिविषये बृहस्पतिः -
प्रचुरान्नान्नपानेषु यदुच्छिष्टमुपस्पृशेत् ।
भूमौ निधाय तद्द्रव्यमाचान्तः शुचितामियात् ॥

तथा - अरण्येऽप्युदके रात्रौ चौरव्याघ्राकुले पथि ।
कृत्वा मूत्रपुरीषे तु द्रव्यहस्तो न दुष्यति ॥
शौचं तु प्रथमं कुर्य्यात् पादौ प्रक्षालयेत्ततः ।
उपस्पृश्य तदभ्युक्ष्य गृहीतं शुचितामियात् ॥

इति पञ्चकस्य ॥ १४५-१४९॥

शाकस्य मूलस्य फलस्य धान्यमुद्गादिकानामप्यचामताया ।
दोषेऽल्पके क्षालनतोऽक्षतायां बहुत्वदोषो गणतः शुचित्वम् ॥ १५०॥
धान्यादिराशेरपि यत्र दोषः तददेशे मात्रोद्धतपूर्वमेव ।
जलं क्षणात् शुद्धिरिति ब्रूवन्ति प्राञ्चो यदि स्यादधिको हि दोषः ॥१५१॥

निर्य्यासमात्रं लवणं गुडश्च दोषऽधिके हेयमथाल्पदोष ।
शुच्यम्बुपानात् शुद्धि शुद्धपक्षि चञ्च्वादिपातेऽपि फलं तु वृन्तात् ।। १५२।।

मनुः (५-११८) - अद्भिस्तु प्रोक्षणं शौचं बहूनां धान्यवाससाम् ।
प्रक्षालनेन त्वल्पानामद्भिरेव विधीयते ।।
शाकमूलफलानां च धान्यवच्छुद्धिरिष्यते ।।

स्मृतिः - वस्त्रधान्यादिराशीनामेकदेशस्य दूषणे ।
तावन्मात्रं समुद्धृत्य शेषं प्रोक्षणमर्हति ।।

तथा चानेकबाह्यानां धान्यादिराशिगृहप्रभृतीनां प्रोक्षणमेवेति प्राश्चः । वायुपुराणे -
तथा निर्य्यासनानां च लवणानां तथैव च ।
प्रोक्षणात्कथिता शुद्धिरित्याह भगवान् यमः ।।

अत्यन्तोपघाते देवलः -
सर्वद्रव्याणां पक्वानां लवणानां गुडस्य च ।
नान्यत्र प्रोक्तं परित्यागादशुद्धानामिति स्थितिः ।।

शुद्धं प्रकृत्य मनुः - शकुनिः फलपातने सङ्गमेध्याभुग्व्यतिरिक्तवृक्षात् फलपातन इति रुद्रधरः । इति त्रयस्य ।। १५०-१५२ ।।

वदन्त्यपक्वान्यपि नारिकेलं विल्वं प्रपूगानि च दाडिमानि ।
नैवेद्ययोग्यान्यमरार्चनायां रम्भाफले स्यादपि यन्न पक्वम् ।। १५३ ।।

शिष्टाः - आम्रं बिल्वं गुवाकं च नारिकेलं च दाडिमम् ।
अपक्वान्यपि चैतानि फलानि विनिवेदयेत् ।।

विष्णुधर्मोत्तरे - 'यन्न पक्वमपि ग्राह्यं कदलीफलमुत्तमम् ।। १५३ ।।

अमेध्यकेदारजभूरिपुष्पं नानाम्रमुख्यादिफलप्रसूने ।
ग्राह्येऽप्यथ कल्पफलप्रसूनवार्त्ताकुवृक्षादिफलप्रसूने ।। १५४ ।।
रसोद्धतवृक्षविनिर्गतो यो निर्य्यास उक्तः स च लोहितश्चेत् ।
सनारिकेलादिभवो न भक्ष्यो भक्ष्यास्तु कर्पूरका हिङ्गुमुख्या ।। १५५ ।।

मनुः(५-५,६) - अभक्ष्याणि द्विजातीनाममेध्यप्रभवाणि च ।
लोहितान् वृक्षनिर्य्यासान्व्रश्चनप्रभवांस्तथा ।।

बौधायनः - अमेध्येषु च ये जाता वृक्षाः पुष्पफलोपगाः ।
तेषामपि न दुष्यन्ति पुष्पाणि च फलानि च ॥ (बौ.स्मृ.९-४)

लतावृक्षादीनाममेध्यजातानां फलपुष्पेषु न दोषः । व्रश्चनप्रभवास्तु निर्यासा अलोहिता अप्यभक्ष्याः । पुनः निर्देशात् । तैत्तिरीयश्रुतिः यथा- 'अथ खलु यो लोहितो य आव्रश्चनान्निर्यासति तस्य नाश्यं काम्यमन्यस्येति । इति कारिकयोः ॥ १५४-१५५॥

भक्ष्येषु यद् यद् हि निशो निशायां दिवा च सम्यग्वरणानिषिद्धम् ।
तद्विष्णुमुख्यार्चितमेव भक्ष्यं भूप्रोतजान्यत्पनसं सदाख्यम् ॥ १५६॥
वर्षा चतुर्मासममाघवर्जं भक्ष्यं मतः मूलकमेव दीर्घम् ।
संस्कारकं तेन च पिष्टकानां स्वयं कृतं यल्लवणं हि भक्ष्यम् ॥ १५७ ॥
कूष्माण्डबीजं हि द्रुतं न भक्ष्यं भक्ष्यं तु मुद्गादिकबीजमुक्तम् ।
भक्ष्याणि वृक्षादपि नान्धकानि धान्यानि बीजान्यपि नेतराणि ॥ १५८॥

विष्णुः(६८/२८-३१) - न दिवाधानाः । न रात्रौ । न सद्यः न दधिसक्तुकोविदारवटपिधलशाकम् ।'

देवलस्तथा - दिवा दधिसुधानासु रात्रौ च दधिसक्तुषु ।
श्लेष्मातके तथा लक्ष्मीर्नित्यमेव कृतालया ॥

ब्राह्मे - अपि प्रयाणसमये रात्रौ न प्राशयो दधि ।
मधुपर्कप्रदानं तु वर्जयित्वा तु कामतः ॥

तत्रैव - पिप्पलानि करञ्जानि कुम्भीरापि वटानि च ।
मातुलङ्गानि प्लक्षाणि पनसोदुम्बराणि च ॥
शिग्रू शोभाञ्जनं चैव कोविदाराणि चैव हि ।
अत्र तिक्तकपित्थानि शेलुश्लेष्मातकानि च ॥
बिभीतकानि च तथा न भक्ष्याणि फलानि तु ।
अलक्ष्मीस्तेषु वृक्षेषु बद्धादुर्वाससा च यत् ॥
वनवासव्रतं कुर्याद्दिनं तत्प्राशनाद् द्विजः ॥

इति दिवसे रात्रौ द्युर्निशोश्च धानादधिरम्यं मातुलंगादीनां निषिद्धानामपि विष्णूदये त्वभक्ष्यत्वे प्राप्तेऽलक्ष्मीकरत्वाद् वर्जनम् ।

यद्यपि विष्णुस्मृतौ नाभक्ष्यं नैवेद्यार्थ इति निषिद्धं द्रव्याणां नैवेद्ये पर्युदासः कृतो न तु वराहपुराणोक्त नैवेद्यद्रव्याणां शिष्टभक्ष्यता कथिता । तथा सति वाक्यत्वे तदापत्तेः । तथापि-श्रुतिस्मृतिसमापन्नं देवद्रव्यगुणान्वितम् ।

देवतायै यथा कलृप्तं प्रोक्षितं शिष्टभोजनम् ।। इति

शंखलिखितौ - देवनैवेद्यसादृश्यलिंगात् सत्त्वोत्कटविष्णुनैवेद्यभक्ष्यतासम्भवात् अपि नास्ति । अत्र पनसस्य यो निषेधः स भूप्रोतफलकदाक्षिणात्यजातिप्रसिद्धपनसपरमिति निबन्धकृतः ।

पनसस्य हविष्यत्वाद् विष्णुदेयत्वाच्च निषेधसम्भावनाया अभावात् । मूलकं तु भक्ष्यम् । निषेधवाक्यानामसन्मूलत्वात् । मूलकस्य शाकं चेति वराहपुराणे मूलकशाकस्य विष्णुनैवेद्ये नेयत्वात् । मूलकं दीर्घमेव चेति वायुपुराणे श्राद्धे देयत्वात् । 'हविःषु द्वे च मूलके' इति मनुवचनेऽशक्तद्विजस्य स्तेयापवादेन भक्ष्यत्वाभ्यनु-ज्ञानात् । सर्वदेशीयाविगीतभक्षणसमाचारात् । कदाचिन्निषेधवाक्यानां प्रामाण्यसन्देहेऽपि वर्षाकालीनपिण्डमूलकपरत्वोपपत्तेः तद्वर्जनमनादरणीयम् ।

योऽर्चयेन्माधवं मूढो भक्षयित्वात्र मूलकम् ।
अपराधशतं तेन कृतं भवति वासव ।।

इति वाक्यस्य प्रामाण्यसन्देहेऽपि माधे विष्णोर्माधवनामकत्वात्तदपराधशंकया माघे तद्वर्जनसमाचारः ।

'ब्राह्मणो मूलकं भुक्त्वा चरेच्चान्द्रायणं व्रतमि' त्यादि माघमासविषयम् । तेनोपक्रमेणोपसंहारपातान्मूलकनिषेधो माघमासविषयमिति विष्णुनैवेद्याधिकारेऽस्मत् पितामह कृष्णबृहत्पण्डितमहापात्रैर्नीतिरत्नाकरे विचारितं द्रष्टव्यम् ।

आषाढशुक्लैकादश्यादिचातुर्मास्यव्रतोपक्रमे स्कन्दपुराणीयक्षेत्रमाहात्म्ये 'पटोलं मूलकं चैव वार्त्ताकुं च न भक्षयेत् ' । इति । तत्रापि मूलकवर्जनम् । अन्येषु मासेषु सप्तसु दीर्घमूलकं भक्षणीयमेव इति मूलकशुद्धिः ।

अङ्गुल्या दन्तकाष्ठं च प्रत्यक्षलवणं च यत् ।
मृत्तिकाभक्षणं चैव तुल्यं गोमांसभक्षणम् ॥

प्रत्यक्षपदोपादानादन्तव्यञ्जनपिष्टकादि संस्कार प्रवेशान्तरेण साक्षादेव केवल भक्षणलवणस्य निषिद्धत्वात्संस्कारलवणं शुद्धम् ।

देवलः - नदीजान्युपयुञ्जीत रोगोत्पत्तिमृते द्विजः ।
कलान्येषां नामतानि वीजानां हि विनाशयेत् ॥

वीजानि कूष्माण्डवीजानीति लक्ष्मीधरः । तस्यायमाशयः

यद्यपि मुद्गादीनि धान्यादीनि चाङ्कुरयोग्यान्येव तथापि तेषां भक्षणानुज्ञानात् । यान्येव कुष्माण्डवीजादीनि विशेषतोऽभक्ष्यत्वेन नोक्तानि तान्यभक्ष्याणि । तान्यपि यदङ्गतान्यपि भक्ष्याण्येव ।

मुदगादीन्यङ्कुरजननार्थं पृथक् स्थापितानि चेत् तदा तानि न भक्ष्याणि इत्येके । शान्तस्य विप्रस्य तु मूलके द्वे चौर्येण नीतेऽपि भक्षणीये । सर्वमसम्भवे चौर्यमसम्भवे मनुवचनमत्र लिखितम् । इति त्रयस्य ॥ १५६-१५८ ॥

परान्नदोषो नहि मातुलस्य भ्रातुगुरोश्च श्वशुरस्य चान्ने ।
किन्त्वत्र निन्द्यं श्वशुरान्नवृत्त्या सन्तो महान्तो निगदन्ति दोषम् ॥ १५९ ॥
अजातपुत्राऽपि सुता मृता चेज्जामातुरप्यन्नमुपन्ति भक्ष्यम् ।
गान्धर्वके वाऽप्यथ राक्षसे वा ब्राह्म्ये विवाहादि तदन्नमास्यम् ॥ १६० ॥

याज्ञवल्क्यः - परपाकरुचिर्न स्यादनिन्द्यामन्त्रणादृते । (१-११२)

अत्रापवादः - गुर्वन्नं मातुलान्नं च श्वशुरान्नं तथैव च ।
पितुः पुत्रस्य यच्चान्नं न परान्नमिति स्मृतम् ॥

यत्तु बौधायनः - श्वशुरान्नं तु यो भुङ्क्ते स भुङ्क्ते पृथिवीमलम् इति तत् गर्हितं श्वशुरधनोपजीविनपरम् । ''श्वशुरान्नस्य वृत्तिः स्यादशस्तैन्यं करोति यः'' इति महाभारतवचनात् । एतेनासक्तिर्न कार्या ।

आदित्यपुराणे- विष्णुं जामातरं मन्ये तस्य मन्युं न कारयेत् ।
अप्रजायां दुहितरि नाश्नीयात्तस्य वै गृहे ॥

ब्रह्मदेये विशेषणे दैवेनेति सदेवाङ्गि
गान्धर्वे राक्षसे चैवमुभयत्र समागमम् ॥

अत्र ब्राह्मदैवविधानदत्तायाः स्तुतायाः श्वशुरसम्बन्धेन । यद्गृहं तत्र तत् स्वामिकस्यान्नभोजने महान् दोषः । गान्धर्वविवाहेऽल्पीयान् दोषः । गान्धर्वराक्षसयोः न दोषः । दुहितरि मृतायां तद्गृहे भोजने न दोषः । इति कारिकयोः ॥ १६०-१६१ ॥ इत्यामान्नादिशुद्धिः ॥

अथ प्रकीर्णशुद्धिः

यत्प्रीतिदायमप्रतिग्रहं च यदा हिरण्यं वा त्वयाचितं तु ।
सद्ब्राह्मणेभ्यो यदि नाप्यते तद् ग्राह्यं स्मृतं ब्राह्मणमात्रतोऽपि ॥ १६१ ॥
महीक्षितोऽक्षत्रियतोऽपि भूमिः प्रतिग्रहाद् वा यदि याचितोऽपि ।
सर्वप्रकारेण परात्मवृत्त्योरसम्भवे ग्राह्यमितोऽपि रिक्थम् ॥ १६२ ॥
अष्टप्रकारं नियतं तदत्राकृष्टक्षितिभूमिरथापि कृष्टा ।
गोजाविहेमानि च धान्यमन्नं क्रमादशस्तं हि परं परं यत् ॥ १६३ ॥
पुरोहितामात्यकृताभिषेकस्त्रीभ्योऽपि राज्ञो धनमेवमाहुः ।
ग्राह्यं यदेषां कुलटादि वर्ज्यं मध्ये प्रवेशः कथितो न साक्षात् ॥ १६४ ॥
सद्धार्मिका क्षत्रियभूमिपाला दैवे तदा देयमिछन्ति केचित् ।
तथा सति क्षत्रियजात्यभावात् कलौ नृपालक्षितिरेव नेया ॥ १६५ ॥
गोभूमिरत्नादिकप्रीतिदायमयाचितं चापदि शूद्रतोऽपि ।
तल्लाभकामेन च शौद्रमन्नं मांसं तथा ग्राह्यमुशन्ति सन्तः ॥ १६६ ॥

अयाचितं द्विविधम् । प्रीतिदायरूपं, प्रतिग्रहरूपं च । तद्द्विविधमपि ब्राह्मणादिभ्यो साधुवृत्तेभ्यः स्त्रीभ्यश्च साधुवृत्ताभावे तज्जातिमात्रेभ्यो न कथञ्चिदपि शूद्रात् । यदाह व्यासः -

"द्विजातिभ्यो धनं लिप्सेत् प्रशस्तेभ्यो द्विजोत्तमः ।
अपि वा जातिमात्रेभ्यो न तु शूद्रात् कथञ्चन ॥

लिप्सेत् स्वीकर्त्तुमिच्छेत् ।

बौधायनः - सुवृत्तब्राह्मणक्षत्रियवैश्यरथकारेभ्यो धनं लिप्सेत् । अयाचितमिति शेषः । रथकारस्य महिष्येण करण्यां जातः । रथकारजाते वक्कलावदभावाद् तद्विषये कारिका न कृता ।

यद्यपि- वेदविद्यापि विप्रोष्य कृत्वा लोभात् प्रतिग्रहम् ।
विनाशं व्रजति क्षिप्रमामपात्रमिवाम्भसि ।। इति

शूद्रयाजनानन्तरं मनुनोक्तं यस्य कस्यापि द्विजासम्भवे शूद्रादयाचितनिषेधपरम् । तथा च याज्ञवल्क्यः (१-२१५)-

अयाचिताहृतं ग्राह्यमपि दुष्कृतकर्मणः ।
नाश्नन्ति पितरस्तस्य दशवर्षाणि पञ्च च ।।
न च द्रव्यं वहन्नपि यस्तु नामवमन्यते ।।

आहूताभूद्यतां प्रतिग्रहीतृगृहे आनीयोपस्थितां भिक्षाकुटुम्बभरणयोग्यद्रव्यरूपां न तु सिद्धान्तरूपमिति भ्रमः कार्यः ।

एतत् शूद्रादपि अयाचिताहृतं ग्राह्यमित्युक्तम् ।।

जावालिरपि - अभ्युद्यतं गृहे भैक्ष्यं ग्राह्यं तत्सर्वतः स्वयम् ।
आत्मन्येव शुभायातं नियुञ्ज्याद् भृतके परम् ।। इति ।।

एवकारोऽभिन्नक्रमः । शुभायातं आत्मनीत्यर्थः । अपरं निन्दितप्रकारोपलब्धम् । भृतके ऽवश्यभरणीये नियुञ्ज्यादित्यर्थः । एतेन राजामात्यराजपुरोहितेभ्यो नियुञ्ज्यादित्यर्थः । अप्ययाचिताहृतं ग्राह्यमित्युक्तम् । अयाचिताभ्यनुज्ञावचनेषु विशेषतः कुलटादीनामेव पर्युदासात् ।

यथैव राजमहिषी राजामात्यपुरोहिताः ।
पापेनार्द्धेन संयुक्ता सर्वे ते राजधर्मिणः ।।

इति प्रतिग्रहनिन्दायां तु याचितप्रतिग्रह एव संगच्छते । एवं राज्ञोऽप्ययाचितं ग्राह्यमेव । अयाचितवाक्ये द्विजातिमात्रोपादानात् । राजकुलटादि मध्ये प्रवेशनाच्च ।

यत्तु आदित्यपुराणे -

अपि पापकृतां राज्ञां प्रतिगृह्णन्ति साधवः ।
पृथिवीं वान्यदिच्छन्ति पावनं ह्येतदुत्तमम् ।।

इति राजकीयद्रव्येषु ग्राह्यत्वेन पृथिव्या एव नियमनात् द्रव्यान्तरमयाचितमप्यग्राह्यम् । इति । तदपि पापकृतामिति विशेषणोपादानात् तदीयद्रव्य विषयमेव अथवा याचितप्रतिग्रहविषयम् । तत्र दुष्कृतकर्मिभ्यो ग्रहणं नानुज्ञातमिति राज्ञोऽयाचितप्रतिग्रहे भूमिग्राह्यत्वेन नियम्यते । अत एव

मनुः(४-३३)- राजतो धनमन्विच्छेत् संसीदन् ब्राह्मणः क्षुधा ।
याज्यान्तेवासिनोर्वापि न त्वन्यत इति स्थितिः ॥

याज्ञवल्क्येऽपि(१-१३०)-

राजान्तेवासियाज्येभ्यः सीदन्निच्छेद्धनं क्षुधा ।

अत्र प्रशस्तद्विजातिभ्यो याचितप्रतिग्रहसम्भवे राजतोऽयाचितं ग्राह्यमिति गम्यते । विज्ञानेश्वरेण सीदन्तीति दायादिधनाद्यभावे राजपरिग्रहे याज्यशिष्यधनग्रहणतया ग्राह्यत्वमिति व्याख्यातम् ।

न चैतद्राजपदं क्षत्रियपरं, न परिपालनवृत्तिक्षत्रियपरमिति वाच्यम् । नारदेन परिपालनवृत्तिक्षत्रियस्य धनग्रहणस्य मुख्यकल्पत्वेनाभिधानात् ।

तथा च नारदः - अर्थिनां भूरिभावाच्च देवत्वाच्च महात्मनाम् ।
श्रेयान् प्रतिग्रहे राज्ञां नान्येषां ब्राह्मणादृते ॥
ब्राह्मणाश्चैव राजानः द्वावप्येतौ धृतव्रतौ ।
नैतयोरन्तरं किञ्चित् प्रजाधर्माभिरक्षणात् ॥
धर्मज्ञस्य कृतज्ञस्य रक्षार्थं शंसतोऽशुचीन् ।
मेध्यसेविधनं प्राहुस्तीक्ष्णाश्चापि महीपतेः ॥
शुचीनामशुचीनां च सन्निपातो यथाम्भसाम् ।
समुद्रे समतां याति तद्वद् राज्ञां धनागमः ॥
यथाग्नौ संस्थितं दीप्त्यै शुद्धिमायाति काञ्चनम् ।
एवं धनागमाः सर्वे शुद्धिमायान्ति राजनि ॥
स्वधर्मे ब्राह्मणस्तिष्ठेद्वृत्तिमाहारयोर्नृणाम् ।
नान्यतः प्रतिगृह्णीयाद् ब्राह्मणो विभवे सति ॥

अशुचिर्वचनाद् यस्य शुचिभर्वति पुरुषः ।
अणुश्चैव बृहत्सद्यः कथं राजा न निन्दितः ॥
विदुर्य एवं देवत्वं राज्ञो ह्यमितेतजसः ।
तस्य ते प्रतिगृह्णन्तो न दुष्येयुः कथञ्चन ॥

मनुः- ''अष्टाभिर्लोकपालानां मात्राभिर्निर्मितो नृपः''।

इति तस्माद्राज्ञो देवत्वम् । तीक्ष्णस्यापि दण्डप्राधान्यात् पीडाकरस्यापि । वहुधनिकत्वेन तद्धनस्य न ग्राह्यत्वम् ।

महाभारतेऽगस्त्येन समानाव्ययजसम्बन्धिना स्वीकारात् । 'अद्रोहेणैव भूतानामि'ति । मनुः- ''यस्य चेच्छति भूमिपः'' इति वचनादशौचिनः शुचित्वम् । शुचेरशुचित्वं दण्डादिना तत्सिद्धम् । परिपालनादि गुणयुक्तात् क्षत्रियादयाचितप्रतिग्रहे न दोषः ।

मनुः(१०-११३,११४) -

सीदद्भिः कुप्यमिच्छद्भिर्धने वा पृथिवीपतिः ।
याच्यः स्यात् स्नातकैर्विप्रैरदित्संस्त्यागमर्हति ॥
अकृतं च कृतं क्षेत्रात् गौरजाविकमेव वा ।
हिरण्यं धान्यमन्नं च पूर्वं पूर्वमदोषवत् ॥

कुप्यं हिरण्यरजताभ्यामन्यद्द्रव्यं, अकृतं अकृष्टं क्षेत्रं भूमिः । पूर्वं पूर्वमदोषवदिति पूर्वपूर्वालाभे उत्तरोत्तरस्वीकारे न दोषः । पूर्वलाभे उत्तरोत्तरस्वीकारे दोष इत्यर्थः । अदित्संत्यागमर्हति, यदा न ददाति तदा तस्य राष्ट्रे न वस्तव्यमित्यर्थः ।

एवं च सति क्षत्रियनृपादयाचितप्रतिग्रहालाभे च क्षत्रियनृपादेस्तदष्टप्रकारं द्रव्यजातं ग्राह्यमिति न नियमः । स्वदेशे स्थित्वा कृष्यादिकरणापेक्षया साधीयान् स्वधर्म एव श्रेयान् स्वल्पेऽप्यनुष्ठितो नावरसेवितस्तस्मात् प्रशस्तः । नावरसेवितं प्रतिगृह्णीयादिति शङ्खलिखिताभ्यां सर्वप्रकारप्रतिग्रहासम्भवे सत्येव पारक्यकृष्यादि वृत्त्यनुज्ञानात् ।

मनुश्च - वरं स्वधर्मो विगुणो न पारक्यः स्वनुष्ठितः ।
परधर्मेण जीवन् हि सद्यः पतति जातितः ॥ (१०-१९७)

तेन स्वदेशराजतः प्रतिग्रहालाभे देशान्तरप्रतिग्रहलाभसम्भावनया गच्छेन्न तु कृष्यादिबुद्ध्या तिष्ठेदित्यर्थः ।

एवं शूद्रादपि याचितायाचितप्रतिग्रहलाभे पारक्यकृष्यादि वृत्तिरित्युक्तं भवति । यस्तु क्षत्रियव्यतिरिक्त उच्छास्त्रेण परिपालनवृत्तिं करोति तस्य याचितायाचितरूपो द्विविधोऽपि प्रतिग्रहो न ग्राह्यः ।

अत्राक्षत्रियप्रतिग्रहः:-न राज्ञः प्रतिगृह्णीयादराजन्यप्रसूतितः ।
सुनाचक्रध्वजवतां वेशेनैव च जीवताम् ॥ (मनु.४-८४)
दशसूनासमं चक्रं दशचक्रसमो ध्वजः ।
दशध्वजसमो वेशो दशवेशसमो नृपः ॥ (मनु.४-८५)
दशसूनासहस्राणि यो वाहयति सौनिकः ।
तेन तुल्यः स्मृतो राजा घोरस्तस्य प्रतिग्रहः ॥ (मनु.४-८६)
यो राज्ञः प्रतिगृह्णाति लुब्धस्योच्छास्त्रवर्त्तिनः ।
स पर्य्यायेण यातीमान्नरकानेकविंशतिम् ॥ (मनु.४-८७)
तामिस्रमन्धतामिस्रं महारौरवरौरवौ ।
नरकं कालसूत्रं च महानरकमेव च ॥ (मनु.४-८८)
संजीवनं महावीचिं तपनं संप्रतापनम् ।
संघातं च सकाकोलं कुड्मलं प्रतिमूर्त्तिकम् ॥ (मनु.४-८९)
लोहशंकुमृजीषं च पन्थानं शाल्मलीं नदीम् ।
असिपत्रवनं चैव लोहदारकमेव च ॥ (मनु.४-९०)
एतद्विदन्तो विद्वांसो ब्राह्मणा ब्रह्मवादिनः ।
न राज्ञः प्रतिगृह्णान्ति प्रेत्य श्रेयोऽभिकांक्षिणः ॥(मनु.४-९१)

अत्र यो राज्ञः प्रतिगृह्णाति अलुब्धस्येति निषेधान्तरम् । तेन लुब्धस्य शास्त्रातिक्रमकारिणः क्षत्रियाक्षत्रियनृपमात्रस्य प्रतिग्रहोऽनेन निषिद्ध्यते । तथा च

याज्ञवल्क्यः - न राज्ञः प्रतिगृह्णीयाल्लुब्धस्योच्छास्त्रवर्त्तिनः ।
प्रतिग्रहे सूनिचक्रिध्वजिवेश्यानराधिपाः ।
दुष्टा दशगुणं पूर्वात् पूर्वादेते यथाक्रमम् ॥ (१-१४०,१४१)

सूना प्राणिवधः । स तस्य जीविकात्वेन धर्मः । स सूनी यथा - मांसविक्रयी । चक्री तैलिकः । ध्वजी शौण्डिकः । वेश्या प्रसिद्धा ।

यमः - अराजन्यप्रसूतस्य राज्ञः स्वच्छन्दवर्त्तिनः ।
घोरः प्रतिग्रहस्तस्य मध्वास्वादो विषोपमः ॥
राजकिल्विषदग्धानां विप्राणामकृतात्मनाम् ।
स्विन्नानामिव बीजानां पुनर्जन्म न विद्यते ॥
तस्मात् प्रतिग्रहं राज्ञो वर्जयन्ति मनीषिणः ।
देवतान्नैश्च पुनराप्यायन्नीह तथैव ये ॥
तथैव राजमहिषी राजामात्यपुरोहिताः ।
पापेनार्द्धेन संयुक्ताः सर्वे ते राजधर्मिणः ॥

देवतान्नैरिति देवस्वब्राह्मणस्वाभ्यामपि वरमाप्यायन्ति । न तु राजप्रतिग्रहं कुर्वन्तीति तात्पर्यम् । हारीतः -

दशसूना सहस्राणि अह्ना राजा करोति वै ।
अन्यच्च कुरुते रात्रौ घोरस्तस्य प्रतिग्रहः ॥

इति यद्यपि क्षत्रियनृपस्यापि दण्डादिना दशसूनां सहस्रकरणं समं तथापि तस्य सम्यक् परिपालनात् तद्राज्यवासिधर्माचरणात्तद् दशांशेन तत् पापक्षयाद्दोषाभावात् प्रतिग्रहे न दोषः ।

यथा गृहस्थस्य पञ्चसूनास्थानवतः पञ्चयज्ञानुष्ठानेन दोषाभावः । तदन्नभक्षणं, यस्य तु पञ्चयज्ञानुष्ठानं नास्ति, तदन्नमभोज्यम् । धर्मेण चाण्डालरूपेण राजप्रतिग्रहदोषमभिधाय -

यदधीते यद्यजते यज्जुहोति ददाति यत् ।
तस्य षड्भागभुग्राजा सम्यक् भवति रक्षणात् ॥

आहिताग्निस्तु यो विप्रः प्रातःस्नायी जितेन्द्रियः।
तस्य षड्भागमात्रेण तत्पापात् प्रतरिष्यसि ॥

अतएव 'राजान्तेवासियाज्येभ्यः सीदन्निच्छेद्धनं क्षुधे' ति विज्ञानेश्वरेण राज्ञो विदितवृत्तान्तादिति व्याख्यातम्।

यातितं तूच्छास्त्रवर्त्तिनोऽपि नृपभूमिमात्रं ग्राह्यम्। नान्यत्। आदित्यपुराणे - 'अपि पापकृता' मित्यनुज्ञावचनात्। नृपास्तु मनुवचने 'अकृतं क्षेत्र' मित्यादि द्रव्यान्तरानुज्ञावचनं तत्र नृपपदस्याराजन्या शास्त्रातिक्रान्ता नृपविषयत्वेऽपि नैवान्नब्राह्मणद्रव्यस्तेयवृत्त्यपेक्षया तदीयधनप्रतिग्रहस्य गुरुत्वाभिधानात्। सर्वप्रकारस्वकीयपरकीयवृत्त्यसम्भवे -

कर्मणा येन केनापि मृदुना दारुणेन वा।
उद्धरेद्धीनमात्मानं समर्थो धर्ममाचरेत् ॥

इति न्यायेन प्राप्तस्योच्छास्त्रराजप्रतिग्रहस्य द्रव्यविशेषनियमः क्रियते। 'अकृतं च कृतं क्षेत्रमि'त्यादिना तत्सिद्धं क्षत्रियनृपादयाचितं मुख्यमुक्तम्। अयाचितासम्भवेऽपि ततः प्रतिग्रहप्रसंगेऽपि इत्यादि द्रव्यविशेषनियमः।

तस्यापि तूच्छास्त्रवर्त्तिनः प्रतिग्रहो न याचितो ग्राह्यः दशवेश्यासाम्यात्। याचितप्रतिग्रहं तु कष्टप्रदम्। द्रव्यविशेषभूमिस्तु ततो ग्राह्यैव। अराजन्यनृपस्य तु नायाचितप्रतिग्रहो ग्राह्यः।

सर्वप्रकारस्वकीयपरकीयवृत्ति-सेवादि-वृत्त्यन्तरासम्भवे तस्य 'अकृतं च कृतं क्षेत्र' मेवंरूपेण द्रव्यविशेषप्रतिग्रह इति। ब्राह्मणवृत्त्यनन्तरं स्मृतिः -

तदसम्भवे क्षत्रियवृत्त्या वैश्यवृत्त्या वापत्कालेऽसाधुभ्यः प्रतिगृह्णीयात्। असाधुभ्यो यदयं प्रतिग्रहः कृष्याद्यपेक्षया हीनः श्रेयान् स्वधर्म इति तु विगुणः प्रतिग्रहश्रेष्ठत्वं शूद्रादिप्रतिग्रहविषयम्।

'तेन वेश्यावृत्त्यसम्भवे उच्छास्त्रवृत्तिः राजादिप्रतिग्रहः' इति लक्ष्मीधराभिप्रायः। अयाचितप्रतिग्रहविषये। अयाचितप्रीतिदाये अतिमात्रद्विजातिभ्योऽप्यलाभे शूद्रादपि प्रसंगोऽस्ति। तदुक्तं हारीतेन-ब्राह्मणः क्षत्रियविड्भ्योऽयाचितोपपन्नं शूद्रेभ्योऽप्येक

आददीत। एवं च यतस्तत्र इत्येतत् मनुवचनं चाण्डालादिपरम्। अतएव कल्पतरौ तस्य धर्म एव श्रेयान्निषेवितः।

तस्मात् प्रशस्तद्विजातिद्रव्याभावे तु यतस्ततः प्रतिगृह्णीयादिति शंखलिखितवाक्ये सर्वतः शूद्रादेरपि प्रतिगृह्णीयान्न तु क्षत्रियादिवृत्तिं कुर्य्यादिति व्याख्यातम्।

विष्णुनारदौ - 'क्रमागतं प्रीतिदायं प्राप्तं च सहभार्य्यये' ति। अविशेषेण सर्ववर्णानां प्रीतिदायस्यापि शूद्रधनत्वेन कथितवन्तौ।

ब्रह्मपुराणे - 'गोभूमिरत्नलाभार्थं सशूद्रस्य गृहे सदे' ति प्रीतिदायेन गोभूमिरत्नादिकामनया शूद्रस्यान्नं ग्राह्यमित्युक्तम्। विस्तरस्तु अस्मत्पितामह कृष्णबृहत्पण्डितमहापात्रकृते नीतिरत्नाकरे द्रष्टव्य इति षट्कस्य॥१६१-१६६॥

मत्स्याममांसे दधिशुक्तसक्तू पिण्याकशाकेषु गुडाश्च धानाः।
तक्रं दधिक्षीरघृतं पयश्चौषधं मृणालं च फलं तिलाश्च॥ १६७॥
सच्छूद्रतो नापदि वाऽऽददीरन् प्रतिग्रहे येऽपि निवृत्तिमन्तः।
शूद्रस्य वेश्मन्यपि दुग्धदध्यादिकं तथाऽश्नीयुरिहाप्यदोषः॥ १६८॥
अशस्तशूद्रादपि गुर्वी तिष्यात्मजादि पित्रादिकपोषणाय।
प्रार्थ्यापि वा ग्राह्यमुशन्ति धान्यं गृहाद् बहिः क्षेत्रखलादिसंस्थम्॥१६९॥
अयाचितं शूद्रवितीर्णरिक्थमपि क्रतौ योग्यमिति प्रणीतम्।
पूर्वं गृहीतस्य च शूद्रतोऽपि शेषेण योगेऽपि न दोष एव॥ १७०॥
आरब्धयज्ञस्य तु दक्षिणार्थं विज्ञानव्याप्तिर्यदि शूद्रतोऽपि।
बलाद्धनं तत्क्रतुदक्षिणार्थं ग्राह्यं नृपालो यदि शास्त्रवेत्ता॥ १७१॥
शतद्वयं यस्य कपर्दकानां कार्षापणानां स तु नाहिताग्निः।
ऊर्ण्णे सहस्रे अपि यस्य वासे यदा स विप्रोऽकृतसोमयागः॥ १७२॥
तस्माद् भुवि पादपरिधभुक्तं नीतं बलेनापि हि यागयोग्यम्।
यः प्रत्यहं लब्धधनोऽप्यदाता ततो बलान्नीतधनं च तद्वत्॥ १७३॥

विवाहकालात्ययनाग्निहोत्रलोपप्रसङ्गे सति वा बलेन ।
शूद्रादितो ग्राह्यमुशन्ति रिक्थमथ प्रतिग्राह्यभृतोऽपि सन्तः ।। १७४ ।।
विच्छेदशंकाग्रयणादिकेष्टिष्वाशंकिता चेद् दशतोऽपि शूद्रात् ।
ग्राह्यं खलक्षेत्रगधान्यमम्भः कूपादिकं गोष्ठगतं पयोऽपि ।। १७५।।

अंगिराः - आममांसदधिघृतं धानाः क्षीरमथौषधम् ।
गुडतक्ररसा ग्राह्या निवृत्तेनापि शूद्रतः ।।
शाकमत्स्यमृणालानि करम्भाः सक्तुजर्त्तिलाः ।
इक्षुफलानि पिण्याकं प्रतिग्राह्यं तु सर्वतः ।।

सर्वतः सूतकादावपि सर्ववर्णेभ्यश्चेत्यर्थः ।

यत्तु - पथिक्षेत्रगतं धान्यं खले यच्च निपातितम् ।
सर्वकालं ग्रहीतव्यं शूद्रेभ्योऽप्यंगिरो मतम् ।।

सर्वकालमनागतमपि -
स्वपात्रे यच्च निक्षिप्तं दुग्धं तच्छुचि नित्यशः ।
पात्रान्तरगतं ग्राह्यं शूद्रास्त्वगृहमागतम् ।।
शूद्रवेश्मनि विप्रेण क्षीरं वा यदि वा दधि ।।
निवृत्तेनापि भोक्तव्यं शूद्रान्नं तदपि स्मृतम् ।।

तथा - अनुग्रहे प्रवृत्तस्य न दोषोंऽगिरसो मतः ।
गुर्वर्थमतिथीनां च भृत्यानां च विशेषतः ।।
शूद्रान्नं प्रतिगृह्णीयान्न तु भुंक्ते स्वयं ततः ।

एतद् गोपालादिव्यतिरिक्तशूद्रविषयम् । सच्छूद्राणामामान्नं प्रतिगृह्य भुञ्जीतेति सिद्धान्तात् । अयाचितस्य पितृदेवगुरुभृत्यन्तरेण चान्यदिति गौतमेन देवार्थद्रव्यस्याप्रत्याख्यायत्वेन भुक्तत्वाद् याचितशूद्रदत्तद्रव्येण यागकरणेऽपि न दोषः । अतएव 'चाण्डालो जायते यज्ञकरणाच्छूद्रभिक्षितादिति ' । याज्ञवल्क्येन (१-१२७) यज्ञार्थभिक्षाया एव निषेधः कृतः ।

एवं च सति प्रतिग्रहादिरूपेण पूर्वं वृत्त्यर्थं शूद्रात् ग्रहणे न दोषः ।

मनुः - यज्ञश्चेत् प्रतिरुद्धः स्यादेकेनांगेन यज्वनः।
ब्राह्मणस्य विशेषेण धार्मिके सति राजनि ॥ (११-११)
यो वैश्यः स्याद् बहुपशुर्हीनक्रतुरसोमपः।
कुटुम्बात् तस्य तद् द्रव्यमाहरेद् यज्ञसिद्धये ॥ (११-१२)
आहरेत् त्रीणि वा द्वे वा कामं शूद्रस्य वेश्मनः।
न हि शूद्रस्य यज्ञेषु कश्चिदस्ति परिग्रहः ॥(११-१३)
योऽनाहिताग्निः शतगुरयज्वा च सहस्रगुः।
तयोरपि कुटुम्बाभ्यामाहरेदविचारयन् ॥ (११-१४)
आदाननित्याच्चादातुराहरेदप्रयच्छतः।
तथा यशोऽस्य प्रथते धर्मश्चैव प्रवर्धते ॥ (११-१५)

प्रतिरुद्धो विलम्बितः। आहरेत्तेनादीयमानमपि तदंगभूतद्रव्य तस्माद् गृह्णीयात्। वैश्यालाभे शूद्रादपि बलादाहरेत्। तदीयधनस्य सर्वथा यज्ञानुपयुक्तेन विधिना हवतोऽप्यदोषः। शूद्रादलाभे द्विजोऽपि यः शतगुः सन्नाहिताग्निः सहस्रगुः सन्न सोमयागवान् तयोर्गृहाद्धर्त्तव्यम्। तयोरप्यलाभे यः प्रत्यहमर्जनेन धनं संचिनोति स किञ्चिद्दानादिना व्ययीकरोति तस्य गृहात् यज्ञं सङ्गं कुर्यात्। धार्मिके सति राजनीतिपदेन संबध्यते। अधार्मिके राजा कदाचिदेवंविधं शास्त्रार्थमविज्ञाय दण्डयेन्निवारयेद्वा। तथा च दक्षिणापूरणार्थं शूद्रात्तदलाभे उक्तब्राह्मणादपि गृहीतं तत्र नाशुद्धमिति अवगन्तव्यम्।

दक्षिणापदेन कार्षापणद्वयम्। द्वात्रिंशत् पणिका गाव इति मूल्याध्यायोक्तत्वात्। तथा च शतं गावो यस्य स शतगुः द्वित्रिंशत्कार्षापणपरिमितधनमित्यर्थः। एवं सहस्रगुरिति बोध्यम्। कलौ वैश्याभावात्तद्विषयेऽत्र कारिका न कृता।

गौतमः - द्रव्यादानं विवाहसिद्ध्यर्थं तत्प्रसंगे च। विवाहकालातिक्रमणादग्निहोत्रादेर्लोपप्रसङ्गे द्रव्यादानं शूद्रादिभ्यो बलेन द्रव्यमादेयमित्यर्थः।

अङ्गिराः - खलक्षेत्रगतं धान्यं वापीकूपगतं पयः।
अभोज्यादपि तद्ग्राह्यं यच्च गोषु गतं पयः॥
विच्छिन्नेषु च यज्ञेषु विषश्रपणेषु च।

इष्टिं ह्यवकृतिं कुर्य्यात् सुकृतं न तु लोपयेत् ।
यज्ञविच्छेदशंकायामभोज्यान्नशूद्रादेः प्रतिग्रहः कार्य इत्यर्थः ॥ १७४ ॥

क्षौद्रदधिक्षीरप्रियंगुशाकधान्यनिधानापलालाम्बुमत्स्याः ।
मूलं फलं काष्ठतृणे च गन्धं पुष्पं कुशाश्चरवो दक्षिणा च ॥ १७५ ॥
मणिश्च शय्यासनयानवेश्मान्ययाचितान्याकरणानि चेत्स्युः ।
ग्राह्याद्यभोज्यान्नगणादपीह परं तु न द्विट् कुलटादिकेभ्यः ॥ १७६॥
अग्राह्यरिक्थं कुलटा कृतघ्नश्चिकित्सकोऽरिः पतितश्च शौण्ढः ।
व्याधोऽपि धूर्त्तोऽथ च वार्द्धुषिश्च बाह्यान्तराधी बहुयाजकोऽपि ॥१७७॥

इति त्रिभिः कुलकम् ।

अधमच्छयं तद्वानपि । तस्य बाह्याभ्यन्तरत्वेन भेदद्वयं तृतीयकाण्डे द्रष्टव्यम् । तत्र प्रतिप्रसववाक्यानि द्रव्यविशेषेषु लेख्यानि । निषेधेभ्योऽपि द्रव्यशेषप्रतिग्रहानुज्ञायां गौतमः -

'एधोदकफलमूलमधवभ्याभ्युद्यतिशय्यासनावसथयानपयोदधि धानाशफरीप्रियङ्गुशाकान्नान्यप्रणोद्यानि सर्वेभ्यः पितृदेवगुरुभृत्यभरणे चान्यत् । सर्वेभ्योऽपि निषेधेभ्योऽदातृभ्यः ।

देवलः - याचितप्रतिग्रहे येषां कुलटादीनां प्रतिप्रसवस्तेषां सुतरां याचितप्रतिग्रहे न चैवमेतदपि वचनमयाचितप्रतिग्रहविषयं किं नेष्यते । तत्राभ्युद्यतपदेन अयाचितस्य द्रव्यमात्रस्य पृथगुपादानात् । अयाचितप्रतिग्रहे निषिद्धकृष्टापि द्रव्यमात्रस्य प्रत्याख्यायत्वेन द्रव्यविशेषेण निर्देशानर्थक्यत्वात् । तेन सामान्यप्रार्थनायां चैधोदकादि दित्सति तदा तन्न प्रत्याहृताख्येयमित्येवं युज्यते । एवमुत्तरत्रापि भरणार्थं याचितमयाचितं च लब्ध्वा न प्रत्याख्यानं कुर्य्यादित्यर्थः । केवलं यज्ञार्थं शूद्रादयाचितमेव ग्राह्यम् । सर्वथा याचितम् । अयाचितलब्धमपि ततोऽन्यत्र न विनियोक्तव्यम् ।

'यज्ञार्थं लब्धमददद् भासः काकोऽपि वा भवेत्' (१-१२७) इति याज्ञवल्क्यवचनात् । गौतमवचनेऽन्नपदेन धान्यमपि गृह्यते । तथा च सुमन्तुः -

'अभोज्यान्नानामपि पुष्पमूलफलशाकतृणकाष्ठधान्यानि क्षेत्रस्थान्यम्बुतडागगोष्ठसंपत्त- यश्चाददतामदोषः, क्षेत्रमत्रोत्पत्तिस्थानम्। मनुना कथितान्यप्याह- (४-२४७,२५०)

'एधोदकं मूलफलपुष्पमभ्युद्यतं च यत्।
सर्वतः प्रतिगृह्णीयान्मध्वथाभयदक्षिणाम्॥
शय्यां गृहान् कुशान् गन्धानपः पुष्पमणीन् दधि।
धाना मत्स्यान् पयो मांसं शाकं चैव न निर्नुदेत्॥

इति न निराकुर्यादित्यर्थः।

मनुः - चिकित्सककृतघ्नानां शल्यहन्तुश्च वार्द्धुषः।
षण्ढस्य कुलटायाश्च उद्यतामपि वर्जयेत्॥

अयाचिताधिकारे वसिष्ठः -

श्रद्दधानस्य भोक्तव्यं चौरस्यापि विशेषतः।
न त्वेतद्बहुयाज्यस्य यश्चोपनयते वहून्।

उद्यतामयाचितोपस्थितामित्यर्थः। शल्यप्रहर्त्ता व्याधादि॥ १७७॥
यत्र क्षेत्रमध्यस्थितत्वामिदानीं प्रतिग्रहीतुर्न तु तत्र दोषः।
तस्मान्निदाने फलमेव तद् यत् स्वामिकं प्राहुरितीह वृद्धाः॥ १७८॥
गंगाकुरुक्षेत्रविभिन्नतीर्थक्षेत्रेष्वधर्म पुरुषार्थ एव।
स्यात् तत् फलैकप्रतिवन्धरूपः प्रतिग्रहे नो नरकाधियातः॥ १७९॥
तद्द्रव्यस्य त्वावधि दूषणोक्तेर्धने समाप्तेर्न फलस्य बाधा।
परन्तु तत्क्रीतधनान्तरस्य सत्त्वेऽपि तीर्थादिफलं न तस्मात्॥ १८०॥
गंगातटादस्तिशतं हि सार्द्धं गंगापदेनारिहितं पुराणे।
क्षेत्रेषु तीर्थेषु तु याजनादि लब्धं धनं तीर्थफलं न हन्ति॥ १८१॥
इति त्रिभिः कुलकम्।
अनेकशोऽश्वादिकदक्षिणा या यागेषु तस्य ग्रहणे न दोषः।
तीर्थादिकं श्राद्धिकदक्षिणापि ग्राह्येति केचिन्नहि तन्मतं नः॥ १८२॥

अन्नादिकं देवनिवेदितं चेद्द्वितीर्यते दानफलं न दातुः ।
अन्तर्गतं तद्यजनेषु यस्मात् प्रतिग्रहीतुर्न तदत्र दोषः ।। १८३ ।।
भक्तं यतः श्रीपुरुषोत्तमस्थं श्रीमज्जगन्नाथनिवेदिते तु ।।
दत्ते गृहीते च फलं विशिष्टं ततोऽस्य दानाचरणं प्रसिद्धम् ।। १८४ ।।
व्रताङ्गतादत्तगवादिकानां प्रतिग्रहे स्यात् क्रतुवन्न दोषः ।
एकापि साक्षान्नहि दण्डधेनुः र्य .... दृष्टाः ।। १८५ ।।

अटव्यः पर्वताः श्रेष्ठा नद्यस्तीर्थानि यानि च ।
सर्वाण्यस्वामिकान्याहुर्नहि तेषु परिग्रहः ।।

इति यमोक्तेः क्षेत्रमध्यस्थितभूमिदानासम्भवः । गंगाकुरुक्षेत्रयोः सर्वथा न किञ्चिद् गृह्णीयात् । तथा च-

सार्द्धहस्तशतं यावत् परितस्तीरभूमिषु ।
तस्यैव स भवेत स्वामी नान्यः स्वामी कथञ्चन ।।
न तत्र प्रतिगृह्णीयात् प्राणैः कण्ठगतैरपि ।
गंगाविक्रयणाद्राजन् विष्णोर्विक्रयणं भवेत् ।।

इति वचनात्तत्र प्रतिग्रहे महानधर्मः । तत्र प्रतिग्रहे धर्मजनकोऽपि क्षेत्रप्रतिग्रहत्वेऽत्र तीर्थवद्वाक्यविशेषाभावान्न क्षेत्रप्रतिबन्धफलं, किन्तु पुरुषार्थो धर्मः । कुरुक्षेत्रविशेषः स्कान्दे-

'कुरुक्षेत्रे च गृह्णानो न भूयः पुरुषो भवेत् ।

तथा चैतद्द्वितीयव्यतिरिक्ततीर्थक्षेत्रेषु नाधर्मः । तथा च प्रयागप्रतिग्रहे तीर्थनिष्फलत्वमभिधाय मात्स्ये -

न तस्य फलदं तीर्थं यावत्तद्धनमश्नुते ।
तस्मात्तीर्थेन गृह्णीयात् पुण्येष्वायतनेषु च ।।
निमित्तेषु च सर्वेषु न प्रमत्तो भवेद्द्विजः ।।

अत्र तीर्थपदेन पुण्यप्रदजलाशयस्थानमुच्यते । समुद्रगंगापुष्करसरस्वत्यादि । पुण्यायतनशब्देन क्षेत्रं पुरुषोत्तमकुरुक्षेत्रवाराणस्यादिः । निमित्तशब्देनार्कसंक्रान्त्यादिः ।

तत्र तीर्थप्रतिग्रहनिषेधातिक्रमेऽनिष्टफलापेक्षायां न तस्य फलदं तीर्थमिति। वाक्यशेषोपात्तात् तीर्थफलानुत्पत्तिरेवानिष्टफलत्वेन कल्प्यते। नाधिकनरकपातादि। तीर्थफलानुत्पत्तिरपि प्रतिग्रहधनत्वे तदुपभोगकाले च तद्द्रव्यविक्रयलब्धद्रव्यान्तर-सत्त्वेऽपि तद्धनविशेषात्। तद्धनसमाप्तौ न तीर्थफलप्रतिबन्धः। यजनादौ तु तीर्थे कृते, तद्धनसत्वेऽपि न प्रतिबन्धः। प्रतिग्रहनिषेधवाक्यमेव तीर्थफलप्रतिबन्ध-श्रवणात्।

यजनादौ दक्षिणास्वीकारे प्रतिग्रहस्वरूपाविशेषेऽपि क्रय एव प्रतिग्रहदोषाभावात्। अतएव वाजपेयादौ हस्त्यश्वानां वहुशः प्रतिग्रहेऽपि न प्रतिग्रहदोषः। यत्तु वार्त्तिककारैः प्रतिग्रहाधिकरणेऽश्वक्रयोऽश्वप्रतिग्रहरूपमित्युक्तम्। तत् प्रौढवादमात्रम्। एवं सति तीर्थक्षेत्रयोः श्राद्धे तत्प्रजार्थाशनेऽपि प्रतिग्रहेऽपि चांगत्वात् अदोष इति केचित्। तन्न। श्राद्धस्य दानरूपत्वमेव न यागरूपत्वम्। तथा च श्राद्धस्वरूपमनुग्रहः। 'विप्रस्वीकारपर्यन्तस्त्यागो द्रव्यस्य यः पितॄनुद्दिश्याख्यमुख्यं, नतु श्राद्धं प्रकीर्त्यते।'

अतएव आपस्तम्वः - 'तथैतन्मनुः श्राद्धं कर्म प्रोवाच। प्रजानिः श्रेयसार्थम्। तत्र पितरो देवता। ब्राह्मणास्त्वाहवनीयार्थे। मासि मासि कार्यम्। अपरपक्षस्य अपराह्णःश्रेयान्' ति। श्राद्धमिति शब्दो वाचको यस्य कालोऽपराह्ण इति। तत्तथा-ब्राह्मणास्त्वाहवनीयार्थे इति त्यक्तव्यद्रव्यप्रतिपत्तिस्थानत्वेनेत्यर्थः। तथा च पितॄनुद्दिश्य द्रव्यत्यागो विप्रस्वीकारपर्यन्तः श्राद्धमिति लक्षणम्।

विष्टरब्राह्मणकश्राद्धेऽपि पश्चाद् ब्राह्मणस्वीकारलक्षणसंगतिः। श्राद्धानुकल्पहिरण्यदाने तु यथोक्तलक्षणसत्त्वात् सम्यगेव लक्षणसंगतिः। एतेन श्राद्धस्य दानत्वं सिद्धमिति।

गंगातीरकुरुक्षेत्रपुण्यस्थानादिषु प्रतिग्रहस्य निषिद्धत्वात् निमन्त्रणं न स्वीकार्यम्। ननु गयाश्राद्धादौ केवलं पिण्डदान स्वस्वत्वध्वंसपूर्वकपरस्वत्वा-पत्तिफलकत्यागरूपस्य दानस्याभावात् कथं दानत्वमिति चेत् उच्यते। परस्वत्वापत्तिनिदानपदार्थान्तर्गता। प्रतिग्रहस्य तृप्त्यर्थत्वात्तत्प्राप्तत्वेन विधेयत्वाभावः। न चैनं प्रतिदत्तादिस्वीकार इव मन्त्रादि नियमो न स्यादिति

वाच्यम् । भोजनादौ दिङ्मुखनियमस्येवादृष्टार्थत्वात् । किं च यदि परस्वत्वापत्तेदानपदार्थान्तरत्वम् । तर्हि विवाहप्रकरणेऽपि पिता प्रत्तामादायेति पारस्करसूत्रे प्रत्तामित्यनेन प्रतिग्रहसिद्धेरादायेति वाच्यं स्यात् । किं च-

मनसा पात्रमुद्दिश्य ततो भूमौ जलं क्षिपेत् ।
विद्यते सागरस्यान्तस्तस्यान्तो न हि विद्यते ।। इति ।

उक्तत्यागमात्रस्य दानत्वं न स्यात् इति प्राञ्चः । वस्तुतः प्रतिग्रहस्यांगत्वादंगानां प्रधानदेशकालान्वयित्वात् दानकाले प्रतिग्रहे समग्रफलं प्रतिग्रहकरणेऽङ्गवैगुण्यम् । वचनात्तु परोक्षदानस्थले काम्यकर्मण्यप्यङ्गवैगुण्ये फलमिति निष्कर्षः ।

मैथिलास्तु यागहोमदानविलक्षणमुत्सर्गाभिधमपि त्यागमाहुः । पुष्करिण्युत्सर्गादौ वा ब्रह्मस्तम्बपर्यन्तानां स्वीकारादानत्वाभावात् । अयमेव न्यायः परोक्षवान् स्थल इति । तत्सिद्धं श्राद्धस्य दानत्वम् । तथा श्राद्धं नामाहवनीयस्य द्रव्यस्य प्रेतोद्देशेन श्रद्धया त्याग इति वदन्ति । विज्ञानेश्वरैरपि दानत्वमुक्तम् । तथा पितृभ्यो ददातीति प्रत्यक्षश्रुतावपि दानत्वम् । तच्च ब्राह्मणस्यास्ति ।

अपसव्यं ततः कृत्वा पितृणामप्रदक्षिणम् ।
द्विगुणांस्तु कुशान् दत्त्वा ह्युशन्तस्त्वेत्यृचा पितृन् ।।
आवाह्य तदनुज्ञातो जपेदायन्तु नस्ततः ।। इति (१/२३२-२३३)

याज्ञवल्क्योक्तेः पितृपितामहप्रपितामहादीनामावाहनेन देवतात्वे ब्राह्मणस्यापि पितृत्वादुद्देश्यत्वोपपत्तिः । अन्यथा प्रोक्ष्येत्यादि ब्राह्मणानुज्ञादिकर्म तद्गतं स्यात् । पितृभ्यो रोचतां यथासुखं वाग्यता जुषध्वमित्याद्युच्चार्य अमुकामुकगोत्रात्तत्तुभ्यमन्नं स्वधा नाम, इति । ब्रह्मपुराणोक्तौ पितृगोत्रोच्चारणमेव न तु निमन्त्रितब्राह्मणस्य ।

ननु पितृयजने इति श्रुते श्राद्धस्य यागत्वमिति चेन्न । तत्र यजतेऽदानार्थे त्वपक्षाश्रयणात् । दानार्थत्वे तु पितृनिति द्वितीयाविभक्तिरनुपपन्नेति चेन्न । पितृनुद्दिश्य यजते इति व्याख्यानस्य अंगीकरणात् । त्यागो द्रव्यस्य यः पितृनुद्दिश्येति मनूक्तिरेवात्र प्रमाणम् ।

एतेन यजने इति वचनमवलम्ब्य श्राद्धस्य यागत्वम् । यागदानोभयरूपत्वं च इति युक्तिजालं वितत्य वदन्तो निरस्ताः । तस्मात्तीर्थादौ श्राद्धद्रव्यदक्षिणे न ग्राह्ये ।

किन्तु गंगातीरकुरुक्षेत्रव्यतिरिक्तपुण्यस्थानेषु तीर्थादिफलानुत्पत्ति-रूपानिष्टदोषसहिष्णोः श्राद्धनिमन्त्रणस्वीकार तद्द्रव्यप्रतिग्रहदक्षिणाप्रतिग्रहादिकं कार्यं न तु सर्वस्नेहास्मन्मतम्। एतत् सर्वं सुधीभिरवधार्य्य कार्य्यम्। एवं देवेभ्यो दत्तस्य नैवेद्यस्य -

विप्रेभ्यस्त्वथ तद्देयं ब्राह्मणैर्यन्निवेदितम्।

न तद्दानं तत् स्वीकारे न प्रतिग्रहदोषः। नैवेद्यप्रतिपत्तेरपि पूजाङ्गत्वेन स्विष्टकुर्वतः स्वीकारपूर्वकदानत्वेऽपि पूजाप्राधान्यात्ततत्स्वीकारे यजनान्तर्गत एव।

केवलं श्रीपुरुषोत्तमस्य जगन्नाथनिवेदितान्नादिदाने फलाधिक्योक्तेस्तदा-चरणमेव। तथा च तत्त्वयामले -

तस्योपभुंक्ते दानेन नरः पापात् प्रमुच्यते।
नास्ति तत्रैव राजेन्द्र स्पृष्टास्पृष्टविवेचनम्॥
यस्य संस्पृष्टमात्रेण यान्त्यमेध्याः पवित्रताम्।
निर्माल्यदानात् पापानि क्षयं यान्ति नृपोत्तमः॥
भक्तिरुत्पद्यते पापक्षयादिव्यभिचारिणी।
भक्त्या ज्ञानमवाप्नोति ज्ञानान्मुक्तिरवाप्यते॥
तस्माद् यत्नेन निर्माल्यदानं दद्याद् द्विजातये।
सौवर्णे राजते पात्रे कांस्ये वा धातुनिर्मिते॥
मृत्पात्रे काष्ठपात्रे वा निर्माल्यं ज़गदीशितुः।
पूरयित्वा प्रयत्नेन दानं दद्याद् विधानतः॥
विप्राय वेदविदुषे वैष्णवो वैष्णवाय च।
वस्त्रयुग्मं समावेष्ट्य दक्षिणासहितं नृपः॥
धेनुर्धान्यं सुवर्णं वा दद्याद् वित्तानुसारतः।
एवं यः कुरुते दानं सर्वपापापनुत्तये॥
ब्रह्महत्यादिपापेभ्यो मुच्यते नात्र संशयः॥
विष्णोर्निवेदितं सर्वमन्नपानादिकं च यत्।
यो ददाति च विप्रेभ्यो दीनानाथेभ्य एव च॥

सर्वपापविनिर्मुक्तो विष्णुभक्तिसमन्वितः ।
निर्माल्यज्ञानसंपन्नस्ततो मोक्षमवाप्नुयात् ॥

रुद्रयामले - समर्पयेत् प्रयत्नेन तदन्नं यो द्विजन्मने ।
उक्तौ तौ दातृभोक्तारौ विष्णुसायुज्यमश्नुते ॥ इति ।

यागदक्षिणाप्रतिग्रहव्रताङ्गदक्षिणाप्रतिग्रहे न दोषः । सा च दक्षिणा जन्माष्टमीप्रभृतिव्रतेषु 'हिरण्यं रजतं गावो वासांसि कुसुमानि चे' त्यादि । एवं प्रायश्चित्तसन्तोषविष्णुभ्यो यानगोभूहिरण्यरजततिलवासोघृतगुडधान्यलवणादि दीयते, तान्यपि द्रव्यताङ्गदानान्यपि तत्प्रतिग्रहे न दोषः । तेभ्यो या ब्रह्मदण्डत्वेन धेनुर्दीयते सा न प्रत्यक्षधेनुः । किन्तु प्रत्याम्नायद्वारीति न दोषः । नन्वस्तु धेनुप्रतिग्रहे दोषाभावः ।

परन्तु - बहुभ्यो न प्रदेयानि गौर्गृहशयनस्त्रियः ।
विभक्तदक्षिणा देया दातारं तारयन्ति हि ॥
एका एकस्य दातव्या न बहुभ्यः कथञ्चन ।
सा च विक्रयमापन्ना दहत्यासप्तमं कुलम् ॥

इत्यंगिरोवचनस्य का गतिरिति चेदुच्यते । एतत् प्रत्यक्षधेनुविक्रयविषयम् । प्रकृते तु धेनुप्रत्याम्नायत्वेन हिरण्यस्य उत्सृष्टत्वात् वा बहूनां प्रतिग्रहे न दोषः । इत्यष्टकस्य ॥ १७७-१८५ ॥

श्रीकृष्णसुप्तावपि भाद्रदर्शे च्छिन्नाः कुशाः संग्रहणेऽपि योग्याः ।
तस्मिंस्तु दर्शे यदि नो विलूना स्तदन्वहे तत्र विलूय योज्याः ॥ १८६ ॥
ये ब्रह्मसूत्रोपगताश्च जीवि मध्यस्थिता येऽपि कुशास्तथैव ।
ते देहवत् शुद्धतमाः प्रदिष्टाः स्वभावतो ये शुचयस्त एव ॥ १८७ ॥
सन्ध्यादियुक्ता अपि होममुख्ये योज्याथ तेन न पुनर्नियोज्याः ।
ये तर्पणश्राद्धचितिक्रतुस्था ब्रह्मेष्टिगा आत्मनसा अमेध्याः ॥ १८८ ॥

इति त्रिभिः कुलकम् ।

ब्रह्मेष्टिः ब्रह्मयज्ञः। अमेध्याः विष्ठाद्यशुचिः।

अनन्तशयनादूर्ध्वं न निर्वपेत् समं क्रतुम्।

छेदनं बर्हिरिध्मानां नारोहेच्चर्मपादुके॥

तत्रापवादमाह मरीचिः -

मासे नभस्यमावास्या तस्यां दर्भचयो मतः।

अयातयामान्येतानि नियोज्यानि पुनः पुनः॥

अत एवास्मद्देशे चातुर्मास्यच्छिन्नकुशैः सद्य एव कर्म कुर्वन्ति न दिनान्तरे। सन्ध्यादिधृतस्य पवित्रोपग्रहादेर्होमादौ विनियोगे सति नर्करिष्टकीविनियोग इति। नर्करिष्टकं चान्यत्र विनियुक्तत्वम्।

गृह्यपरिशिष्टम् - दर्भाः कृष्णाजिनं मन्त्राः ब्राह्मणा हविरग्रयः।

अयातयामान्येतानि नियोज्यानि पुनः पुनः॥

ये तु पिण्डास्तृता दर्भाः यैः कृतं पितृतर्पणम्।

अमेध्या शुचिलिप्ता ये तेषां त्यागो विधीयते॥

लघुहारीतः - चितौ दर्भाः मार्गदर्भाः ये दर्भाः यज्ञभूमिषु।

स्तरणासनपिण्डेषु षट्कुशान् परिवर्जयेत्।

मूत्रोच्छिष्टास्तृता ये च तेषां त्यागो विधीयते॥

शिष्टाः - वल्मीकोदकछायास्तु भूमिदग्धा च ये कुशाः।

शूद्रोत्पाटितगोक्षुण्णा आप्लुता छेदिता नरवैः।

ब्रह्मयज्ञे च ये दर्भाः ये दर्भाः पितृकर्मणि॥

ते त्याज्या इत्यर्थः। अत्रास्मत्कारिकायां विनियोगविषयत्वात् वल्मीकोद्भवकुशादयो न लिखिताः। लघुहारीतः -

नीविमध्ये च ये दर्भा ब्रह्मसूत्रे च ये स्थिताः।

पवित्रांस्तान् विजानीयाद्यथा कायस्तथा कुशाः॥

इति त्रयस्य॥१८५- १८८॥

स वर्जितैः पुष्पसमित्कुशाश्च क्रीता धनैः शूद्रहृताश्च शुद्धाः ।
पूजानियोगादधिकं हि पुष्पं चौर्येण चेन्नीतमदुष्टमेव ।। १८९ ।।
पद्मोत्पलार्कान्युचितानि सर्वामरार्चने कुड्वलितान्यपि स्युः ।
स्यात् केतकी सर्वदलस्वरूपा यथा तथैकेन दलेन पुण्या ।। १९० ।।
पुष्पाणि पञ्चाहमथोत्पलानि ह्येकादशाहानि जलं त्र्यहं च ।
यद् वा विशेषः कनकं तु मासं पक्षं त्वजीर्णं यदि कर्णिकारम् ।। १९१।।
असम्भवे केवलमेतदेवं तथोत्पलं केतकमल्लिके च ।
दशाहमष्टाहमुदीरिता तु जाती शुचिश्चम्पकपुष्पमेवम् ।। १९२ ।।
विल्वस्य पत्रं शुचिदेशसंस्थं, पुन्नागपद्मे दिनपञ्चकं च ।
द्विवार्त्तिके पाटलिका करञ्जे क्षुद्रं त्र्यहं स्याद्बकुलं च शुद्धम् ।। १९३।।
मन्दारपुष्पं च चतुर्दिनानि तथैव घस्रं करवीरपुष्पम् ।
शुष्कं तथा पर्युषितं न वर्ज्यं पत्रं तुलस्या जलधौतमेव ।। १९४ ।।

इति चतुर्भिः कुलकम् ।

सुवर्णरत्नादिविनिर्मितं यत्तन्नित्यशुद्धं गदितं प्रसूनम् ।
दत्तं पुनः स्यात् शुचिवस्त्रपुष्पं स्वीयास्त्रमन्त्रेण कृतं विशुद्धम् ।। १९५।।

क्षुद्रं बृहतीपुष्पम् । विष्णुधर्मोत्तरे -

धर्मार्जितैर्धनक्रीतैर्यः कुर्यात् केशवार्चनम् ।
उद्धरिष्यत्यसन्देहं सप्त पूर्वापरावरान् ।।
पञ्चविंशत्यतीतांश्च पञ्चविंशत्यनागतान् ।
नरकादात्मनो वंश्यान्नात्र कार्य्या विचारणा ।

यत्तु- समित्कुशादिपुष्पाणि ब्राह्मणः स्वयमाहरेत् ।
शूद्रानीतैः क्रयक्रीतैः कर्म कुर्वन् व्रजत्यधः ।।

इति तत् स्वाहरणप्ररोचनार्थम् उदितहोमप्रशंसार्थानुदितहोमनिन्दावत् **'पुष्पाण्यर्चा** पिधानार्था' इति स्तेयापवादेन पूजापर्याप्तपुष्पस्य परस्मात् **स्तेयेऽ**न्यपूजायामदोषः । प्रपञ्चसारे -

'अर्कपद्मोत्पलादन्यन्मुकूलानि विवर्जयेत् ।'

स्कान्दे - एकपत्र्यापि केतक्या यदि संपूजितो हरिः ।
पूजितो द्वादशाब्दे तु केशवस्तस्य निश्चितम् ॥
केतकीपत्रपुष्पं तु सद्यस्तुष्टिकरं हरेः ।

एतेनाखण्डपुष्परूपेण पत्ररूपेण च देवत्वमुक्तम । विष्णुधर्मोत्तरे -

पुष्पाणि पञ्चरात्राणि फलान्येकादशं दिनम् ।
पत्राणि च त्रिरात्राणि शुद्धतोयानि चैव हि ॥
दिनैकं करवीरं तु पाटलं तु दिनत्रयम् ।
चतुर्दिनं तु मन्दारं पुन्नागं पञ्चरात्रकम् ॥
पुन्नागद्विगुणश्चैव केतक्युत्पलमल्लिका ।
चम्पकजातिपुष्पाणि न स्युर्द्विर्दिनपूजनम् ॥
करञ्जं वकुलं बिल्वं बृहतीवार्त्तिकद्वयम् ।
दितत्रयमिदं योग्यं तुलसीद्वयमुच्यते ॥
नित्यप्रक्षाल्यतोयेन शुद्धस्थानेषु संग्रहात् ।
तत्कालानामलाभे तु पूजितैः संविधीयते ॥ इति ।

अन्यत्र - पङ्कजं बिल्वपत्रं च यावत् पञ्चदिनावधि ।
न वर्ज्यं तुलसीपत्रं शुष्कं पर्युषितं तथा ॥

विष्णुधर्मोत्तरे - गृह्णाति तुलसीपत्रं शुष्कं पर्युषितं हरिः ।
सुवर्णमणिपुष्पैश्च प्रीतो भवति नाच्युतः ॥

स्कान्दे - वस्त्रनिर्मितपुष्पैश्च पूजयित्वेष्टदेवताम् ।
साधयेदीप्सितं कर्म सत्यमेतत् ब्रवीमि ते ॥
अस्त्राभ्युक्षणतः शुद्ध्येत् वस्त्रपुष्पं दिने दिने ।
कृत्रिमान्यनुलेपानि गन्धेनापि सुगन्धिना ॥
यावच्चन्द्रश्च सूर्यश्च यावत्तिष्ठति देवता ।
न निर्माल्यं भवेद् दुष्टं माला रत्नविभूषिता ॥१८९-१९५॥

तैलं निषिद्धं तिथिवारभेषु येषूदितं तेष्वपि गन्धतैलम् ।
तैलं च पुष्पं कुसुमाधिवासं द्रव्यान्तरेणापि युतं न दुष्टम् ।। १९६ ।।
यस्तैलशब्दस्तिलस्नेहमुख्यः स्नेहे तु गौणः किल सर्षपादौ ।
तत्सर्षपे नो वचनाच्च दोषस्तत्पक्वपूपाद्यशने न दोषः ।। १९७ ।।
सदा तिलस्नानकृतविशुद्धास्तिला निषिद्धा तिथिभादिकेऽपि ।
दर्शार्कसंक्रान्त्युपरागसप्तभेष्वेव काम्यस्तु निषिद्ध एषाम् ।। १९८ ।।

तिथिवारनक्षत्रविशेषेषु यत्र यत्र तैलोपभोगे दोष उक्तस्तत्र तत्र तिलप्रभवस्नेह एव गृह्यते न सर्षपादिस्नेहः। तैलशब्दस्य तत्र गौणत्वात्। अतएव कात्यायनीयवार्त्तिके तैलप्रत्ययानुशासनस्य महाभाष्यकृता गौणप्रयोगेण प्रत्याख्यानं कृतम्। यत्तु पठन्ति -

पक्वतैलं गन्धतैलं सार्षपं पुष्पवासितम् ।
वर्ज्याहिष्वप्यदुष्टं स्याद् द्रव्यान्तरयुतं तथा ।।

तत्र सार्षपस्य प्रतिप्रसवोऽनुवाद एव पक्वतैलाद्यभ्यनुज्ञायां दृष्टान्तार्थः। तस्मात् सार्षपैरण्डस्नेहादौ मुख्यतैलत्वाभावादनुतैलनिषेधे तन्निषेधः।
तथा च प्रचेताः - 'तैलाभ्यङ्गनिषेधे च तिलतैलं निषिध्यते ।। इति
तेन निषिद्धतिथ्यादिषु सार्षपस्नेहादिपक्वापूपभक्षणेऽपि न दोषः।
यत्तु चिन्तामणौ -

तथा सप्तम्यमावास्यासंक्रान्तिग्रहणेषु च ।
धनपुत्रकलत्रार्थी तिलपिष्टं न संस्पृशेत् ।।

इति। तथा तथा सर्वदा स्नानविधिः पुण्यबलात् धनपुत्रकलत्रकामस्य काम्यनिषेधो नान्यस्य। यद्यपि -

प्रतिपद्यनपत्यः स्याद् द्वितीयायामपत्नीकः ।
दशम्यां च धनं स्नानं सर्वं हन्ति त्रयोदशी ।।

तदारोग्यस्नानविषये राजमार्त्तण्डे उपसंहारात्तत्परमेवेति ज्ञेयम् ।

इति त्रिकस्य ।। १९६-१९८ ।।

शस्तं तृणं दारुपलालमन्त्यस्पृष्टं च चन्द्रार्यमरश्मिवातैः ।
शुचिर्न शंक्यं यदि प्रोक्षणेन तथैव खट्वासनयाननौकाः ॥ १९९ ॥
नौकुण्डमंचो पलसंक्रमेभवृक्षेषु न स्पर्शनदोष उक्तः ।
परन्तु वृक्षस्य यदेकशाखा त्वङ्गेषु संस्पर्शनमेव उक्तम् ॥ २००॥
मण्डुकमार्जारकमूषिकाश्च कीटाः पतङ्गाः कृमिमक्षिकाश्च ।
अमेध्यमाक्रम्य यदा स्पृशेयुर्मेध्यं तदा तत्र न दुष्टता स्यात् ॥ २०१ ॥
अस्पृश्यमारभ्य परस्पराप्तसंस्पर्शनो शुद्धमथो तृतीयम् ।
प्रक्षालनाच्छुद्धमथो चतुर्थं तथाविधं प्रोक्षणतो विशुद्धम् ॥ २०२ ॥
स्पर्शेऽनीलार्केन्दुकराग्निसोमौ पांश्वार्द्रविन्दुद्विरदाहतोऽपि ।
उक्ता अशुद्धा क्रमतोऽपि शुद्धाश्चाथापि चण्डालजलेतरस्या ॥ २०३ ॥
विण्मूत्ररेतोऽस्थिस्थितार्त्तवैश्च शब्देन पूयैर्ज्वलिताकृशानोः ।
चितिस्थवह्नेः पचितस्य चाग्नेरन्योऽग्निरुक्तो ग्रहणीय एव ॥ २०४ ॥
अजाविको लोष्ट्रखराश्वकाकोलूकोत्थिताद्ग्राम्यपतत्रिधूर्त्तान् ।
स्त्रीपादसंमार्जनकोद्धृताच्च विकारजस्पर्शनमेव शुद्धम् ॥ २०५ ॥
गोभृंगचर्मास्थिक चाविशुद्धा विण्मूत्रविष्ठानि तथा मतानि ।
तथापि शृङ्गास्थिषु सर्वलोकैः कुत्रापि नैव व्यवहार इष्टः ॥ २०६ ॥
गोश्वोष्ट्रयानस्थ यतो निषेधः सन्दस्य शास्त्रे तु न तन्निषेधः ।
स्कन्धस्य योगः शकटादिके हि गवामतो यानमिदं हि शस्तम् ॥ २०७॥
संतन्यमानं परितस्तृणानां संस्पर्शनादौ गदितं विशुद्धम् ।
कल्पादिकेऽजाश्वमुखं विशुद्धं वत्साननं प्रस्रवने तु शुद्धम् ॥ २०८ ॥
उत्सृष्टभाण्डादिकखर्परादिनाशुद्धमल्पं पदवीं गतं च ।
अमेध्यलग्नाग्निगोधूममुञ्ज चोच्छिष्ट उक्तादिक वाप्प एव ॥ २०९ ॥
अज्ञायमाना यदि गन्धहीना विष्ठापि सप्ताहमतीत्य शुद्धा ।
अज्ञातदोषा यदि पादुका स्यादस्पृश्यवती भवतीह शुद्धा ॥ २१० ॥

हारीतः - 'पुक्कसादिस्पृष्टानां प्रस्तरतृणकाष्ठानामादित्यदर्शनात् शौचम्।'
तथापि शकटापगमे मनुः(५-१२२) -

'प्रोक्षणात् तृणकाष्ठानां पलालं चैव शुद्ध्यति।'

बौधायनः - आसनं शयनं यानं नावः पन्था तृणानि च।
मारुतार्केण शुद्ध्यन्ति पक्वेष्टकचितानि च॥

आचारपल्लवे - कुण्डे मञ्चे शिलापृष्ठे नौकायां गजवृक्षयोः।
संग्रामे संक्रमे चैव स्पर्शदोषो न विद्यते॥

परन्तु वृक्षैकशाखाद्व्यस्पर्शे दोष एव। तथा च आपस्तम्बः -

एकशाखां समारूढश्चण्डालादिर्भवेद्यदि।
ब्राह्मणस्तत्र निवसन् स्नानेन शुचितामियात्॥
मार्जारमूषिकाकीटपतङ्गकृमिदर्दुराः।
मेध्यामेध्यं स्पृशन्तोऽपि न दुष्टं मनुरब्रवीत्॥

मार्जारश्चंक्रमे शुचिरिति शास्त्रान्तरं च। शातातपः -

अशुचिं संस्पृशेद् यस्तु एक एव स दुष्यति।
तं स्पृष्ट्वाऽन्यो न दुष्येत्तु सर्ववर्णेष्वयं विधिः॥

देवलः - उपस्पृश्याशुचिस्पृष्टं तृतीयं वापि मानवः।
तथैव पादौ हस्तौ च प्रक्षाल्याचम्य शुद्ध्यति॥

चण्डालः प्रथमस्तु स्पर्श द्वितीयः। तत् स्पृष्टस्पर्शो तृतीयः। अत्रातीतचण्डालस्पर्शस्य द्वितीयस्य स्पर्शे यदाचमनं तदा कामाकामतः पूर्वस्य स्नानमेव।

उत्सर्गिनं स्पृशेद् यस्तु स्नानं तस्य विधीयते।
ऊर्ध्वमाचमनं प्रोक्तं द्रव्याणां प्रोक्षणं तथा॥

इति स्मृत्यन्तरात्। याज्ञवल्क्यः(१-१९३) -

रश्मिरग्नीरजश्छाया गौरश्वो वसुधाऽनिलः।
विप्रुषो मक्षिकाः स्पर्शे वत्सः प्रस्रवने शुचिः॥

मक्षिकेति कीटाद्युपलक्षणम् । पूर्वलिखितपराशरोक्तेः । अश्वपदं हस्तिनोऽप्युपलक्षणम् । 'पृष्ठतो गौर्गजस्कन्ध' इति यमवचनात् । विप्रुषः क्षीरादिविन्दवः । केवलं चण्डालछायाक्रमणे दोषः । तथा च ब्रह्मपुराणे-

चण्डालपतितछायास्पर्शे दुष्टतनुर्भवेत् ।

अङ्गिरा अपि - यस्तु छायां श्वपाकस्य ब्राह्मणोऽप्यधितिष्ठति ।

सचैलो जलमाप्लुत्य घृतं प्राश्य विशुद्ध्यति ॥

अग्निस्तु कश्मलादिदूषितः । तथा च शंखः -

अकश्मलैः समिद्धोऽग्निर्दुर्मनुष्यैरदूषितः ।

सर्वेषामप्यशौचानां समर्थः शोधनाय तु ॥

श्वपाकवृषलौ भोक्तुं ब्राह्मणाग्निर्न गर्हितः ।

पतिताग्नेश्चिताग्नेश्च न शिष्टैर्ग्रहणं स्मृतम् ॥

कश्मललक्षणं पूर्वमुक्तम् । रजोऽप्यजादिव्यतिरिक्तस्य । तथा च याज्ञवल्क्यः -

श्वकाकोष्ट्रखरोलूकशूकरग्राम्यपक्षिणाम् ।

अजाविरेणुसंस्पर्शादायुर्लक्ष्मीश्च हीयते ॥

स्त्रीपादसम्मार्जनी रजश्चैवम् ।

अजारजः खररजस्तथा सम्मार्जनीरजः ।

स्त्रीणां पादरजो राजन् शक्तस्यापि श्रियं हरेत् ॥

इति शास्त्रान्तरात् । महाभारतीय-दानधर्मे

पयसा हविषा दध्ना शकृता चर्मणा तथा ।

अस्थिभिश्चोपकुर्वन्ति शृङ्गैर्बालैश्च भारत ॥

तथा शृङ्गास्थ्नोरपि शुद्धत्वमुक्तम् । गोरस्थिस्पर्शनं न स्नाननिमित्तमिति कैश्चिल्लिखितम् । तथा च शृङ्गास्थ्नोः सर्वथा व्यवहारो न दृश्यते । मनुः -

'गवां यानं च पृष्ठेन सर्वथैव विगर्हितम् ।'

एतेन रथशकटादिषु गोयानं निषिद्धम् । स्कन्दस्यानिषेधात् ।

अत एव विष्णुः - 'अदान्तैरशिक्षितैरपि मलवद्वासो निषेधवदशिक्षितानां न निषेधः ।
स्मृतिः 'मक्षिका सन्ततिधरि'ति । सन्ततिः संतन्यमानं तृणादिति बन्धकृतम् ।
'पादौ शुचि ब्राह्मणानाम्' इति बृहस्पतिवचनम् ।'पदा स्पृष्टं च कामतः' इत्यस्यापवाद
इति निबन्धकृतः । याज्ञवल्क्यः(१-१९४) -

'अजाश्वयोर्मुखं मेध्यम्' ।

स्मृतिः - वाक्प्रशस्तं चिरातीतमनेकान्तरितं लघुशुद्धमित्यर्थः ।

चिरातीतमुत्सिष्टभाण्डखर्परादिक्षुद्रं मार्गस्थं तत्स्पर्शनेन स्नाननिमित्तम् । चण्डालादि एकान्तरिते स्नानमित्युक्तमेव ।

लघु उत्सिष्टवाष्प तत् स्पृष्टमारुतास्पृश्याग्निधूमादिकं नाशुद्धमित्यर्थः ।

स्मृतौ - पादुके वापि गृह्णीयात् अस्पृश्यस्पर्शवारणे ।
सप्तरात्रोत्थितां विष्ठां वसिष्ठः प्राह मृत्तिकाम् ॥

इदं प्रत्यभिज्ञायमाने गन्धाद्यभावे च बोध्यम् । इति द्वादशकस्य ॥ १९९-२१० ॥

कन्यालये गोरसतैलकेषु यत्राकरेष्वेव सदा शुचित्वम् ।
जलेक्षणात् पुस्तकमेति शुद्धं विप्राङ्घ्रिलग्नं शुचिकामतोऽपि ॥ २११ ॥
संक्षालिताल्पा वहुरक्षितात्तु रज्जुः शुचिर्वस्त्रगृहं यदंशे ।
दुष्टं तदंशोत्कृतपूर्वमम्वु क्षणात्तु वायुक्षणमात्रकेण ॥ २१२ ॥

शातातपः - गोरसे कन्दुशालायां तैलयन्त्रेक्षुयन्त्रयोः ।
अमीमांस्यानि शौचानि स्त्रीषु राजकुलेषु च ॥

बौधायनः - 'आकराः शुचयः सर्वे वायवो समुदीरिताः' ।

विष्णुः - 'प्रोक्षणेनैव पुस्तकम्' ।

याज्ञवल्क्यः(१-१९३) - 'वत्सः प्रस्नवने शुचिः ।'

रज्जुविषये वस्त्रगृहविषये च पाकमूलरज्जुफलेत्यादि प्रागुलिखितमनुसन्धेयम् । इति कारिकयोः ॥ २११- २१२ ॥

चित्रादिके कारुकरो विशुद्धः पक्वान्नवर्जं शुचि सर्वपण्यम् ।
परस्य यानं शयनासने चान्तर्द्धानवन्त्येव शुचीनि वस्त्रैः ॥ २१३ ॥

अमेध्यसम्बन्धजगन्धलेपापाये यदा द्रव्यचये च मृद्भिः ।

तत्रैव शुद्धिः शुचि कुङ्कुमादिलेपातिगन्धापगमे त्वदोषः ।। २१४।।

मनुः(५-१२९) - 'नित्यं शुद्धः कारुहस्तः पण्ये यच्च प्रसारितम्' ।

कारुश्चित्रवस्त्रनिर्णेजनादौ नान्यकर्मणि । पण्यं च सिद्धान्नवर्जम् ।।

तथा चापस्तम्बः - 'नाऽऽपणीयमन्नमश्नीयात्तथा रसान् मधुमांसलवणानि परिहाय' ।

गौतमः - 'आसनं शयनं यानमन्तर्द्धाय समाचरेत्' ।

परकीयमित्यर्थः । अन्तर्द्धाय शुद्धवस्त्रेणाच्छाद्य । एतदपि प्रक्षालनपूर्वकं लेपाभावे तु न क्षालनम् । 'तुलिकामुपधानं च' इत्यादि पूर्ववचनात् ।

मनुः(५-१२६) -'यावन्नापैत्यमेध्याक्ताद् गन्धो लेपश्च तत्कृतः ।

तावन्मृद्वारि चादेयं सर्वासु द्रव्यशुद्धिषु ।।'

'गन्धो लेपश्च तत्कृतः' इति वचनात् कुङ्कुमादिगन्धलेपयोः पूर्वस्थयोः सत्वेऽपि नाशुचित्वम् । इति कारिकयोः ।। २१३-२१४ ।।

जिह्वाभिमर्षाद् पदचाल्पमेव तद्दान्तलग्नं रदवद्विशुद्धम् ।

यद्वापि यावद्रसनाभिमर्षान्नैव च्युतं स्यात् शुचिता सदैव ।। २१५ ।।

शुद्धं मतं श्मश्रुमुखप्रविष्टं लेपः शुचिः श्मश्रुगतो मतोऽपि ।

ताम्बूललेपादिरपि प्रतीतो दन्ताभिलग्नो मुनिभिर्विशुद्धम् ।। २१६ ।।

द्रव्यस्य शुद्धिर्यदि दुष्टतानि ज्ञानप्रमाणान्यतमेव तस्य ।

यदातिशंकां तदद्भिर्विधौतं तथापि शंकां यदि वाक्प्रशस्ता ।। २१७ ।।

गौतमः - 'दन्तश्लिष्टे दन्तवदन्यत्र जिह्वाभिमर्षणात् प्राक् च्युतेरित्येके ।'

'च्युतेरास्रावलालावन्निगिरन्ते तच्छुचिः ।'

अस्यार्थः - अन्यत्र जिह्वाभिमर्षणात् यावज्जिह्वायाः भेदो नोपलभ्यते इत्यर्थः । सत्यपि जिह्वाभिमर्शनेन यावन्न च्यवते तावच्छुद्धिरित्येके मन्यन्ते ।

वसिष्ठः - 'यच्चाप्यन्तर्मुखे आचान्तस्यावशिष्टं निगर्ण्णे तच्छुचिः ।'

आचान्तस्य मुखे यदवशिष्यते दन्तलग्नातिरिक्तमपि तदपि निगिरन्नेव शुद्धिरित्यर्थः ।

याज्ञवल्क्यः (१-१९५) - 'श्मश्रु चास्यगतं दन्तसक्तं त्यक्त्वा ततः शुचिः' ।
अत्र विज्ञानेश्वराः -

'श्मश्रु चास्य प्रविष्टं उच्छिष्टं न भवति ।''

दन्तसक्तं चान्नादिकं स्वयमेव च्युतं त्यक्त्वा शुचिर्भवति ।

अच्युतं दन्तसमम् । तथा च दन्तश्लिष्टमित्यादि लिखित्वा तन्निवारणं पुनरनेन याज्ञवल्क्यवचनेन विकल्प्यते । निगरन्नेवेत्येवकारस्तु चर्वणे त्वाचमेन्नित्यमुक्त्वा ताम्बूलचर्वणम् । 'दन्तोष्ठौ विलोमकौ स्पृष्ट्वा वासो विपरिधाय चे'ति विष्णूक्ताचमननिषेधार्थाः । इति ।

वसिष्ठः - 'न श्मश्रुगतो लेपोऽशुचि' रिति विशेषः ।

देवलः - 'दन्तलग्नं समहार्य्यं लेपं मन्येत दन्तवत् ।'

मनुः (५-१२७) - त्रीणि देवाः पवित्राणि ब्राह्मणानामकल्पयत् ।
अदृष्टमद्भिर्निर्णिक्तं यच्च वाचा प्रशस्यते ॥''

अस्यार्थः - यद् द्वेषत्वेन अदृष्टमज्ञातं येनापि प्रमाणेन यत्र दोषो न ज्ञात इत्यर्थः । दोषशंकायां तु निर्णीक्तं क्षालितम् । शुद्धौ कृतायामपि शंकायां वाचा प्रशंसया शुद्धिरित्यर्थः । इति चतुष्कस्य ॥ २१५-२१७ ॥

अन्नादिके श्रीपुरुषोत्तमाख्ये क्षेत्रे श्रीजगन्नाथमहाप्रसादे ।
नोच्छिष्टता पर्युषितत्वदूरं गत्वा शुचिस्पर्शनमुज्झदोषाः ॥ २१८ ॥
याः स्थापिता तत्र तु सा दिनेन्द्रद्युम्नेन दारुप्रतिमाश्चतस्रः ।
तद्भञ्जनेऽपि प्रतिमान्तराणां तत्तुल्य नैवेह वरप्रदानात् ॥ २१९ ॥
आस्थां प्रतिष्ठा प्रतिमान्तराणां कार्य्या नवानां जगदीश्वरस्य ।
क्वापि स्थिताश्चेत् प्रतिमास्तु दैवात् तद्दानकार्या प्रतिमां कदाचित् ॥२२०॥
क्षेत्रे तु या श्रीभुवनेश्वराख्य श्रीलिंगराजस्य न लिंगभावः ।
ततस्तथा तस्य महाप्रसादो यत्नेन भक्ष्यो गदितो मुनीन्द्रैः ॥ २२१ ॥

ब्रह्मवैवर्त्ते - जगन्नाथस्य नैवेद्यं महापातकनाशनम् ।
भक्षणात् फलमाप्नोति कपिलाकोटिदानजम् ॥

स्कान्दे - शुष्कं पर्य्युषितं वापि गत्वा वा दूरदेशतः ।
यथा तथोपभुक्तं तत्सर्वपापापनोदनम् ॥

विष्णुयामले - यत् किञ्चिद् भक्षणादेव मुक्तिमाप्नोति दुर्लभाम् ।
पतितामरसंस्पृष्टं नास्ति दोषोऽपि भक्षणे ॥

तत्त्वयामले - नास्ति तत्रैव राजेन्द्र स्पृष्टास्पृष्टविवेचनम् ।
यस्य संस्पृष्टमात्रेणामेध्याः यान्ति पवित्रताम् ॥

बृहद्विष्णुपुराणे - नैवेद्यं जगदीशस्य अन्नपानादिकं च यत् ।
भक्ष्याभक्ष्यविचारस्तु नास्ति तद्भक्षणे द्विजः ॥
ब्रह्मवन्निर्विकारं तद् यथा विष्णुस्तथैव हि ।
विकारं चे प्रकुर्वन्ति भक्षणे ते द्विजातयः ॥
कुष्ठव्याधिसमायुक्ताः पुत्रपौत्रविवर्जिताः ।
निरयं यान्ति ते विप्रा यस्मान्नावर्त्तते पुनः ॥

ब्रह्मवैवर्त्ते - कुक्कुरस्य मुखाद्भ्रष्टं यदन्नं जायते पुनः ।
इन्द्रादीनां तु तद्भक्ष्यं भाग्यतो यदि लभ्यते ॥

भविष्ये - अन्त्यवर्णैर्हीनवर्णैः सङ्करप्रभवैरपि ।
स्पृष्टं जगत्पतेरन्नं भुक्तं सर्वाघनाशनम् ॥

भगवद्वाक्यम् - ये नाश्नन्ति मन्नैवेद्यं स्पृष्टास्पृष्टविवेकतः ।
तांश्च भ्रंश्यामि संपद्भ्यो दण्डं तेभ्यो ददाम्यहम् ॥

स्कान्दे - नाभिमानं प्रकुर्वीत विष्णोः निर्माल्यभक्षणे ।
भक्त्या लोभात् कौतुकाद्वा क्षुधासंगमनेऽपि वा ॥
आकण्ठं भक्षितं तद्वत् पुनाति सकलाहंसः ॥

अन्यानि विस्तरभयात् न लिखितानि ।

व्रतादावन्यविष्णुप्रतिमापूजादौ निवेदितस्य मक्षिकाङ्घ्रिप्रमाणेन अनश्नन् पतितो भवेदिति वचनात् प्रतिपत्त्यर्थं किञ्चिद् भक्षणमेव प्रतिपादितम् । अत्र सम्पूर्णभक्षणे फलाधिक्यमेवेति आकण्ठभक्षणान्मुक्तिरित्यादिना प्रतिपादितम् ।

तथा च आकण्ठमित्यादावाङ्मर्यादाऽभिविध्यर्थता मर्यादार्थता चेत्युभयं गृह्यते। तथा च क्षुधासद्गमनेऽपि फलपर्याये मर्यादार्थता। यथा विष्णु तथैवेत्युक्तत्वात् कामतोऽन्त्यजैर्न स्पर्शनीयं किन्तु विष्णुदर्शनवत् भोजनीय इति व्यवस्था। अत्र श्रीभुवनेश्वरप्रस्तावे शिवपुराणे ब्रह्माणं प्रति शिववाक्यम् -

गत्वैकाम्रे दैवतैः मानमेतैर्मल्लिङ्गं च लिङ्गराजं पुराणम्।
दिव्यैर्द्रव्यैः पूजय स्वप्रयत्नात्तन्नैवेद्यं यत्नतश्चापि भुंक्ष्व॥

तथा च पुनर्ब्रह्मप्रश्नोत्तरम् -

शृण्वन्तु देवताः सर्वाः शृणु त्वं पद्मसम्भवः।
श्रुत्वा मद्वचनं छिन्धि संशयग्रन्थिबन्धनम्॥
एतल्लिङ्गं न देवास्त्वं न रुद्रो नैव माधवः।
अर्द्धमात्रात् परं यत्तु तदिदं लिङ्गमब्जजम्॥ इति।
अग्राह्यं शिवनिर्माल्यं निर्लिङ्गो भुवनेश्वरः।
तस्मात् पुत्रोपभुंक्ष्व त्वं नैवेद्यं सह दैवतैः॥

इत्यादि बहुवचनेषु। यथा नीलाद्रिनाथस्य नैवेद्यं दोषवर्जितं तथैकाम्रादिपुराणादिवचनेषु श्रीभुवनेश्वरमहाप्रसादस्य भक्ष्यत्वमेवेति भक्षणसमाचारः॥ २१८-२२१॥

यद्यन्महापातकहेतुभूतं तत्तद्विना द्रव्यमशेषमेव।
अभक्ष्यमसौषधगर्हभक्ष्यं दोषेऽधिकेऽल्पे तु यथोपयुक्तम्॥ २२२॥

सुमन्तुः - लशुनपलाण्डुकुम्भी नवश्राद्धसूतिकामधुमांसमूत्ररेतो मूर्ध्नि संमार्जनीयक्षुद्रवासश्च। 'एतान्येव व्याधितस्य भिषक्क्रियायामनिषिद्धानि भवन्ति। यानि तान्येवं प्रकाराणीति। अत्र यद्यपि सर्वतः आत्मानं गोपायेदिति विधिना। ननु औषधव्याधिनिवृत्त्यर्थविहितस्याप्यभक्ष्यस्याग्नीषोमीयहिंसावन्निषेध-विषयत्वायोगात् पृथक्वचनमनर्थकम्। तथा च -

कर्मणा येन केनापि मृदुना दारुणेन वा।
उद्धरेद्धयमात्मानं समर्थो धर्ममाचरेत्॥

धर्मश्च प्रथमं तावत् प्रायश्चित्तात्मको भवेत् ।

ततस्तेन विशुद्धस्य फलार्थोऽन्यो भविष्यति ॥

इति न्यायेन सर्वतः आत्मानं गोपायेदित्यस्य न्यायस्य प्राप्तानुवादात् येषां व्याधिनाश प्राणक्षयादौ विशेषानुज्ञानास्ति तेषामल्पदोषत्वं, यत्र तु विशेषानुज्ञ तत्र दोषलेशस्याभावान्न प्रायश्चित्तम् ।

केवलमहापातकहेतुभूतसुरापानादेः प्राणत्यागादपि त्याज्यत्वमेव । न च सर्वत आत्मानं गोपायेदिति विधिना सुरापानस्यापि प्राणत्यागादौ निर्दोषता किं न स्यादिति वाच्यम् । यानि चान्यान्येवं प्रकाराणि इति सुमन्तूक्तौ एवं प्रकारशब्देन महापातकहेतुभूतव्यतिरिक्तानामेव भक्षणतोक्तत्वात् अभक्षणतामपि रोगाधिक्यन्यूनत्वानुसारेण भक्ष्यत्वमिति दिक् ॥ २२२ ॥

आचारशौचद्विजदेवतामृत्तोयानि देशेषु च येषु येषु ।

यान्येव देशेषु च तेषु तेषु अन्यानि शुद्धान्युदितानि सर्वैः ॥ २२३ ॥

मरीचिः - येषु स्थानेषु यच्छौचं धर्माचारश्च यादृशः ।

तत्र तत् पावनं मन्ये धर्मस्तत्रैव तादृशः ॥

येषु देशेषु ये देवा येषु देशेषु ये द्विजाः ।

येषु स्थानेषु यत्तोयं या च तत्रैव मृत्तिका ॥ २२३ ॥

श्री नीलाम्वरराजगुर्वभिधया ख्यातो हरेकृष्णभू-

र्नाथ प्राप्तगजातपत्रतद्भूयः कौशिकः कोविदः ।

चक्रे योऽपि चतुर्मुखादिकमखान् श्रीशुद्धिसारे कृते

तत्पुत्रेण गदाधरेण सुधियो काण्डो द्वितीयोऽगमत् ॥ २२४ ॥

इति श्रीगदाधरराजगुरुविरचिते शुद्धिसारे द्वितीयकाण्डः समाप्तः ॥ २ ॥

• • • • • •